गण—(अदन्तः)—चुरा U. से. संख्याने, to count, to enumerate. इह संख्यानं नाम संख्यानिमित्त-ज्ञानविशेषः, भागशोऽवस्थानं च. Pre. लट्—गणयति-ते. गणयसि-से. गणयामि-गणये. Pot. विधिलिङ्—गणयेत्-त. Imp. लोट्—गणयतु-गणयताम्. Impf. लङ्—अगणयत्-त. Perf. लिट्—गणयांचकार-चक्रे. Aor. लुङ्—अजगणत्-त, अजीगणत्-त. Fu. लृट्—गणयिष्यति-ते. Per Fu. लुट्—गणयिता. Ben. आशिषि लिङ्—गण्यात्, गणयिषीष्ट. Pas. कर्मणि—गण्यते. Des. सनन्त—जिगणयिषति-ते. Fre. यङन्त—जंगण्यते. PP. निष्ठा—गणितः. IP. क्त्वा—गणयित्वा, Inf. तुमुन्—गणयितुम्.

गद्—भ्वा P. से. व्यक्तायां वाचि, to say, to speak. Pre. लट्—गदति. Pot. विधिलिङ्—गदेत्. Imp. लोट्—गदतु. Impf. लङ्—अगदत्. Perf. लिट्—जगाद. Aor. लुङ्—अगदीत् अगादीत्. Fu. लृट्—गदिष्यति. Per Fu. लुट्—गदिता. Ben. आशिषि लिङ्—गद्यात्. Pas. कर्मणि—गद्यते. Aor. कर्म-लुङ्—अगादि. Cau. णिजन्त—गादयति, Aor. णिच्-लुङ्—अजीगदत्. Des. सनन्त—जिगदिषति. Kri. कृत्य—गद्यम्. PP. निष्ठा—गदितः. IP. क्त्वा—गदित्वा. Inf. तुमुन्—गदितुम्.

गम्—भ्वा P. अ. गतौ, to go. Pre. लट्—गच्छति. गच्छसि. गच्छामि. Pot. विधिलिङ्—गच्छेत्. गच्छेः. गच्छेयम्. Imp. लोट्—गच्छतु. गच्छ. गच्छानि. Impf. लङ्—अगच्छत्. अगच्छः. अगच्छम्. Perf. लिट्—जगाम, जग्मतुः, जग्मुः. जगन्थ-जगमिथ, जग्मथुः, जग्म. जगाम-जगम, जग्मिव, जग्मिम. Aor. लुङ्—अगमत्. अगमः. अगमम्. Fu. ऌट्—गमिष्यति. गम्धातोः सकारादेरिट् परस्मैपदेषु. Per Fu. लुट्—गन्ता, Con. ऌङ्—अगमिष्यत्. Ben. आशिषि लिङ्—गम्यात्. Pas. कर्मणि—गम्यते. Aor. कर्म-लुङ्—अगामि. Cau. णिजन्त—गमयति-ते. Aor. णिच्-लुङ्—अजीगमत्-त. Des. सनन्त—जिगमिषति. Fre. यङन्त—गत्यर्थाद् धातोः कौटिल्यार्थे एव यङ् भवति, न तु क्रियासमभिहारे. कुटिलं गच्छति इति—जङ्गम्यते. Kri. कृत्य—गन्तव्यः. PP. निष्ठा—गतः. IP. क्त्वा—गत्वा. Inf. तुमुन्—गन्तुम्.

The cau. too with the prep.—आ, may follow the Atm., if it means to have patience; आगमयस्व तावत्, wait a little.

With prep. सम्, it follows the Atm., if intransitive; संगच्छते, Aor. लुङ्—समगत-समगंस्त.

गर्ज्—भ्वा P. से. शब्दे, to roar. Pre. लट्—गर्जति. Pot. विधिलिङ्—गर्जेत् Imp. लोट्—गर्जतु. Impf. लङ्—अगर्जत्. Perf. लिट्—जगर्ज. Aor. लुङ्—अगर्जीत्. Per Fu. लुट्—गर्जिता. Ben. आशिषि लिङ्—

गर्ज्यात्. Pas. कर्मणि—गर्ज्यते. Cau. णिजन्त—गर्जयति, Aor. णिच्-लुङ्—अजगर्जत्. Des. सनन्त—जिगर्जिषति. PP. निष्ठा—गर्जितः. IP. क्त्वा—गर्जित्वा. Inf. तुमुन्—गर्जितुम्.

गा—(गाङ्)—भ्वा A. अ. गतौ, to go.

Pre. लट्—	गाते	गाते	गाते
	गासे	गाथे	गाध्वे.
	गै	गावहे	गामहे.
Pot. विधिलिङ्—	गेत	गेयाताम्	गेरन्.
	गेथाः	गेयाथाम्	गेध्वम्.
	गेय	गेवहि	गेमहि.

Imp. लोट्—गाताम्, गास्व, गै. Impf. लङ्—अगात, अगाथाः, अगै. Perf. लिट्—जगै, जगाते, जगिरे. जगिषे, जगाथे, जगिध्वे. जगे, जगिवहे, जगिमहे. Aor. लुङ्—अगास्त. अगास्थाः. अगासि. Fu. ऌट्—गास्यते. Per Fu. लुट्—गाता. Con. ऌङ्—अगास्यत. Ben. आशिषि-लिङ्—गासीष्ट. Pas. कर्मणि—गीयते. Aor. कर्म-लुङ्—अगायि. Cau. णिजन्त—गापयति, Aor. णिच्-लुङ्—अजीगपत्. Des. सनन्त—जिगासते. Fre. यङन्त—जेगीयते. Inf. तुमुन्—गातुम्.

गाह्—(गाहृ)—भ्वा A.से. विलोड़ने, to agitate; प्रवेशे, to dive, to bathe. Pre. लट्—गाहते. Pot. विधिलिङ्—गाहेत. Imp. लोट्—गाहताम् Impf.

लङ्—अगाहत. Perf. लिट्—जगाहे. जगाहिषे, जघाक्षे, जगाहाथे, जगाहिध्वे-जगाहिढ्वे-जघाढ्वे. जगाहे. Aor. लुङ्—अगाढ-अगाहिष्ट, अघाक्षाताम्-अगाहिषाताम्, अघाक्षत-अगाहिषत. अगाढ़ाः-अगाहिष्ठाः, अघाक्षाथाम्-अगाहिषाथाम्, अघाढ्वम्-अगाहिध्वम्-ढ्वम्. अघाक्षि-अगाहिषि. Fu. लृट्—गाहिष्यते-घाक्ष्यते. Per Fu. लुट्—गाहिता-गाढ़ा. Con. लृङ्—अगाहिष्यत-अघाक्ष्यत. Ben. आशिषि लिङ्—गाहिषीष्ट-घाक्षीष्ट. Pas. कर्मणि—गाह्यते. Aor. कर्म-लुङ्—अगाहि. Cau. णिजन्त—गाहयति-ते. Aor. णिच्-लुङ्—अजीगहत्-त. Des. सनन्त—जिघाक्षते-जिगा-हिषते. Fre. यङन्त—जागाह्यते. PP. निष्ठा—गाढ़ः. IP. क्त्वा—गाहित्वा-गाढ्वा. Inf. तुमुन्—गाहितुम्-गाढुम्.

गुप्—(गुपू)—भ्वा P. वे. रक्षणे, to defend, to protect, Pre. लट्—गोपायति. Pot. विधिलिङ्—गोपायेत्. Imp. लोट्—गोपायतु. Impf. लङ्—अगोपायत्. Perf. लिट्—गोपायांचकार-जुगोप, गोपायांचक्रतुः, जुगुपतुः. गोपायांचकर्थ-जुगोपिथ-जुगोप्थ. गोपायांचकार-जुगोप, गोपायांचकृव-जुगुपिव जुगुप्व. Aor. लुङ्—अगोपायीत्-अगोपीत्-अगौप्सीत्, अगोपायिष्टाम्-अगोपिष्टाम्-अगौप्ताम्. Fu. लृट्—गोपायिष्यति-गोपिष्यति-गोप्स्यति. Per Fu. लुट्—गोपायिता-गोपिता-गोप्ता. Con. लृङ्—अगोपायिष्यत्-अगोपिष्यत् अगोप्स्यत्. Ben. आशिषि लिङ्—गोपाय्यात्-गुप्यात्. Pas. कर्मणि—गोपाय्यते-गुप्यते. Aor. कर्म-लुङ्—अगोपायि-अगोपि. Cau. णिजन्त—गोपाययति-

ते-गोपयति-ते. Aor. णिच्-लुङ्—अजुगोपायत्-त-अजूगुपत्-त. Des. सनन्त—जुगोपायिषति-जुगुप्सति-जुगुपिषति-जुगोपिषति. Fre. यङन्त—जोगुप्यते. Kri. कृत्य—गोपायितव्यः-गोपितव्यः-गोप्तव्यः,-गोपनीयः, गोप्यः. PP. निष्ठा गोपायितः गुप्तः. IP. क्त्वा—गोपायित्वा-गुपित्वा-गोपित्वा-गुप्त्वा. Inf. तुमुन्—गोपायितुम्-गोपितुम्-गोप्तुम्.

The desiderative form of this verb, Atm. means 'to reproach'. निन्दार्थे गुप्-धातुर्नित्यसन्नन्तः, अस्माद् नित्यमेव निन्दार्थे आत्मनेपदम्. सनोऽत्र अनार्द्धधातुकत्वान्नेट्. Pre. लट्—जुगुप्सते. Pot. विधिलिङ्—जुगुप्सेत. Imp. लोट्—जुगुप्सताम्. Impf. लङ्—अजुगुप्सत. Perf. लिट्—जुगुप्सांचक्रे. Aor. लुङ्—अजुगुप्सिष्ट. Fu. ऌट्—जुगुप्सिष्यते. Per Fu. लुट्—जुगुप्सिता. Ben. आशिषि लिङ्—जुगुप्सिषीष्ट. Pas. कर्मणि—जुगुप्स्यते. Cau. णिजन्त—जुगुप्सयते. Kri. कृत्य—जुगुप्सितव्यः. PP. निष्ठा—जुगुप्सितः. Inf. तुमुन्—जुगुप्सितुम्.

गुह्—(गुहू)—भ्वा U. से. संवरणे. to hide, to cover, to keep secret. Pre. लट्—गूहति-गूहते. Pot. विधिलिङ्—गूहेत्-त. Imp. लोट्—गूहतु-गूहताम्. Impf. लङ्—अगूहत्-त. Perf. लिट्—जुगूह-जुगुहे, जुगूहतुः-जुगुहाते, जुगूहुः-जुगुहिरे. जुगूहिथ-जुगोढ़-जुगुहिषे-जुघुक्षे, जुगूहथुः—जुगुहाथे, जुगूह-जुगुहिध्वे-जुघुध्वे. जुगूह-जुगुहे, जुगूहिव-जुगूह्व-जुगुहिवहे-जुगुह्वहे, जुगूहिम-जुगूह्म-जुगुहिमहे-जुगुह्महे. Aor. लुङ्—अगूहीत्-अघुक्षत्-अगूहिष्ट-

अगूढ़-अघुक्षत. Fu. लृट्—गूहिष्यति-घोक्ष्यति-गूहिष्यते-घोक्ष्यते. Per Fu. लुट्—गूहिता-गोढ़ा. Ben. आशिषि लिङ्—गुह्यात्-गूहिषीष्ट घुक्षीष्ट. Pas. कर्मणि—गुह्यते. Aor. कर्म-लुङ्—अगूहि. Cau. णिजन्त—गूहयति-ते. Aor. णिच्-लुङ्—अजूगुहत्-त. Des. सनन्त—जुघुक्षति-ते. Fre. यङन्त—जोगुह्यते. PP. निष्ठा—गूढ़ः. IP. क्त्वा—गुहित्वा-गूहित्वा-गूढ्वा. Inf. तुमुन्—गूहितुम्-गोढुम्.

गृह्—भ्वा A. वे. ग्रहणे to take. Pre. लट्—गर्हते. Pot. विधिलिङ्—गर्हेत. Imp. लोट्—गर्हताम्. Impf. लङ्—अगर्हत. Perf. लिट्—जगृहे. जगृहिषे-जघृक्षे. जगृहिध्वे-जगृहिढ्वे-जघृढ्वे. जगृहे, जगृह्वहे-जगृहिवहे. Aor. लुङ्—अगर्हिष्ट-अघृक्षत, अगर्हिषाताम्-अघृक्षाताम्, अगर्हिषत-अघृक्षन्त. अगर्हिष्ठाः-अघृक्षथाः, अगर्हिषाथाम्-अघृक्षाथाम्. अगर्हिषि-अघृक्षि, अगर्हिष्वहि-अघृक्षावहि, अगर्हिष्महि-अघृक्षामहि. Fu. लृट्—गर्हिष्यते-घर्क्ष्यते. Per Fu. लुट्—गर्हिता-गर्ढा. Con. लृङ्—अगर्हिष्यत-अघर्क्ष्यत. Ben. आशिषि लिङ्—गर्हिषीष्ट-घृक्षीष्ट. Pas. कर्मणि—गृह्यते, Cau. णिजन्त—गर्हयति-ते. Des. सनन्त—जिगर्हिषते-जिघृक्षते. Fre. यङन्त—जरीगृह्यते. IP. क्त्वा—गर्हित्वा-गर्ढ्वा. Inf. तुमुन्—गर्हितुम्.

गॄ—तुदा P. से. निगरणे, to devour, to swallow. Pre. लट्—गिरति-गिलति. Pot. विधिलिङ्—गिरेत् गिलेत्. Imp. लोट्—गिरतु-गिलतु. Impf. लङ्—अगिरत्-अगिलत्. Perf. लिट्—जगार-जगाल. जगरिथ-

जगलिथ. जगार-जगाल, जगरिव-जगलिव. Aor. लुङ्—अगारीत्-अगालीत्, अगारिष्टाम्-अगालिष्टाम्. अगारीः. अगालीः, अगारिष्टम्-अगालिष्टम्. अगारिषम्-अगालिषम्, अगारिष्व-अगालिष्व.

Fu. लृट्—	गरिष्यति	गरीष्यति,
	गलिष्यति	गलीष्यति.
Per Fu. लुट्—	गरिता	गरीता,
	गलिता	गलीता.
Con. लृङ्—	अगरिष्यत्	अगरीष्यत्,
	अगलिष्यत्	अगलीष्यत्.

Ben. आशिषि लिङ्—गीर्य्यात्. Pas. कर्मणि—गीर्यते, Aor. कर्म-लुङ्—अगारि, अगालि. Cau. णिजन्त—गारयति-गालयति, Aor. णिच्-लुङ्—अजीगरत्-अजीगलत्. Des. सनन्त—जिगरिषति-जिगलिषति. Fre. यङन्त—जेगिल्यते. PP. निष्ठा—गीर्णः. Inf. तुमुन्—गरितुम्-गलितुम्, गरीतुम्-गलीतुम्.

गॄ with	अव	अवगिरते	अवगिलते.
,, ,,	सम्	संगिरते	संगिलते.

नित्यं शब्दं संगिरन्ते वैयाकरणाः.

गॄ—क्र्या P. से, शब्दे, to sound, to speak. Pre. लट्—गृणाति. Pot. विधिलिङ्—गृणीयात्. Imp. लोट्—गृणातु. गृणीहि. गृणानि. Impf. लङ्—अगृणात्.

Perf. लिट्—जगार. Aor. लुङ्—अगारीत्, Fu. लृट्—गरिष्यति-गरीष्यति. Per Fu. लुट्—गरिता-गरीता. Con. लृङ्—अगरिष्यत्-अगरीष्यत्. Pas. कर्मणि—गीर्यते, Aor. कर्म-लुङ्—अगारि. Cau. णिजन्त—गारयति, Aor. णिच्-लुङ्—अजीगरत्. Des. सनन्त—जिगरिषति. PP. निष्ठा—गीर्णः. Inf. तुमुन्—गरितुम्-गरीतुम्.

गै—भ्वा P. अ. शब्दे to sing. Pre. लट्—गायति. Pot. विधिलिङ्—गायेत्. Imp. लोट्—गायतु. Impf. लङ्—अगायत्. Perf. लिट्—जगौ. Aor. लुङ्—अगासीत्. Fu. लृट्—गास्यति. Per Fu. लुट्—गाता. Con. लृङ्—अगास्यत्, Ben. आशिषि लिङ्—गेयात्. Pas. कर्मणि—गीयते, Aor. कर्म-लुङ्—अगायि. Cau. णिजन्त—गापयति-ते, Aor. णिच्-लुङ्—अजीगपत्-त. Des. सनन्त—जिगासति. Fre. यङन्त—जेगीयते. Kri. कृत्य—गातव्यः, गानीयः, गेयः. PP. निष्ठा—गीतः. IP. क्त्वा—गीत्वा, प्रगाय, Inf. तुमुन्—गातुम्.

ग्रन्थ्—(ग्रथि)—भ्वा A. से. कौटिल्ये, to be crooked. Pre. लट्—ग्रन्थते. Pot. विधिलिङ्—ग्रन्थेत. Imp. लोट्—ग्रन्थताम्. Impf. लङ्—अग्रन्थत. Perf. लिट्—जग्रन्थे. Aor. लुङ्—अग्रन्थिष्ट. Fu. लृट्—ग्रन्थिष्यते. Per Fu. लुट्—ग्रन्थिता. Con. लृङ्—अग्रन्थिष्यत. Ben. आशिषि लिङ्—ग्रन्थिषीष्ट. Pas. कर्मणि—ग्रन्थ्यते, Aor. कर्म-लुङ्—अग्रन्थि. Cau. णिजन्त—ग्रन्थयति-ते, Aor. णिच् लुङ्—अजग्रन्थत्-त. Des. सनन्त—जिग्रन्थिषते

Fre. यङन्त—जाग्रन्थ्यते. Kri. कृत्य—ग्रन्थितव्यः. PP. निष्ठा—ग्रन्थितः. IP. क्त्वा—ग्रन्थित्वा. Inf. तुमुन्—ग्रन्थितुम्.

ग्रन्थ्—क्र्या P. से. सन्दर्भे, to tie, to fasten—

Pre. लट्—	ग्रथ्नाति	ग्रथ्नीतः	ग्रथ्नन्ति
	ग्रथ्नासि	ग्रथ्नीथः	ग्रथ्नीथ
	ग्रथ्नामि	ग्रथ्नीवः	ग्रथ्नीमः
Pot. विधिलिङ्—	ग्रथ्नीयात्	ग्रथ्नीयाताम्	ग्रथ्नीयुः
	ग्रथ्नीयाः	ग्रथ्नीयातम्	ग्रथ्नीयात
	ग्रथ्नीयाम्	ग्रथ्नीयाव	ग्रथ्नीयाम.
Imp. लोट्—	ग्रथ्नातु	ग्रथ्नीताम्	ग्रथ्नन्तु
	ग्रथान	ग्रथ्नीतम्	गथ्नीत
	ग्रथ्नानि	ग्रथ्नाव	ग्रथ्नाम
Impf. लङ्—	अग्रथ्नात्	अग्रथ्नीताम्	अग्रथ्नन्
	अग्रथ्नाः	अग्रथ्नीतम्	अग्रथ्नीत
	अग्रथ्नाम्	अग्रथ्नीव	अग्रथ्नीम
Perf. लिट्—	जग्रन्थ	जग्रन्थतुः / जग्रथतुः	जग्रन्थुः / जग्रथुः
	जग्रन्थिथ	जग्रन्थथुः / जग्रथथुः	जग्रन्थ / जग्रथ
	जग्रन्थ	जग्रन्थिव / जग्रथिव	जग्रन्थिम / जग्रथिम

केचित्—प्रथमपुरुषैकवचने-जग्रथ, उत्तमपुरुषैकवचने—जग्रथ-जग्राथ, एवम् अतुसादिषु--ग्रेथतुः, ग्रेथुः, इति वदन्ति तन्नाथ्यादौ अनुक्तत्वादप्रमाणमिति प्रामाणिकाः. Aor. लुङ्—अग्रन्थीत्. Fu. लृट्—ग्रन्थिष्यति. Per Fu. लुट्—ग्रन्थिता. Con. लृङ्—अग्रन्थिष्यत्. Ben. आशिषि-लिङ्—ग्रथ्यात्. ग्रथ्याः. ग्रथ्यासम्. Pas. कर्मणि—ग्रथ्यते, Aor. कर्म-लुङ्—अग्रन्थि. Cau. णिजन्त—ग्रन्थयति, Aor. णिच् लुङ्—अजग्रन्थत्. Des. सनन्त—जिग्रन्थिषति. Fre. यङन्त—जाग्रथ्यते. Kri. कृत्य—ग्रन्थितव्यः. PP. निष्ठा—ग्रथितः. IP. क्त्वा—ग्रथित्वा-ग्रन्थित्वा. Inf. तुमुन्—ग्रन्थितुम्.

ग्रस्—भ्वा A. से. अदने, to swallow, to eat. Pre. लट्—ग्रसते. Pot. विधिलिङ्—ग्रसेत. Imp. लोट्—ग्रसताम्. Impf. लङ्—अग्रसत. Perf. लिट्—जग्रसे. Aor. लुङ्—अग्रसिष्ट. Fu. लृट्—ग्रसिष्यते. Per Fu. लुट्—ग्रसिता. Con. लृङ्—अग्रसिष्यत. Ben. आशिषि-लिङ्—ग्रसिषीष्ट. Pas. कर्मणि—ग्रस्यते, Aor. कर्म-लुङ्—अग्रासि. Cau. णिजन्त—ग्रासयति पिण्डं देवदत्त', Aor. णिच्-लुङ्— अजिग्रसत्. Des. सनन्त—जिग्रसिषते. PP. निष्ठा—ग्रस्तः. IP. क्त्वा—ग्रसित्वा-ग्रस्त्वा. Inf. तुमुन्—ग्रसितुम्.

ग्रह्—क्र्या U. से. उपादाने, to take,

परस्मैपद.

Pre. लट्—	गृह्णाति	गृह्णीतः	गृह्णन्ति
	गृह्णासि	गृह्णीथः	गृह्णीथ
	गृह्णामि	गृह्णीवः	गृह्णीमः

आत्मनेपद.

गृह्णीते	गृह्णाते	गृह्णते
गृह्णीषे	गृह्णाथे	गृह्णीध्वे
गृह्णे	गृह्णीवहे	गृह्णीमहे

Pot. विधिलिङ्—गृह्णीयात्—गृह्णीत.

परस्मैपद.

Imp. लोट्—	गृह्णातु	गृह्णीताम्	गृह्णन्तु
	गृहाण	गृह्णीतम्	गृह्णीत
	गृह्णानि	गृह्णाव	गृह्णाम

आत्मनेपद.

गृह्णीताम्	गृह्णाताम्	गृह्णताम्
गृह्णीष्व	गृह्णाथाम्	गृह्णीध्वम्
गृह्णै	गृह्णावहै	गृह्णामहै

परस्मैपद.

Impf. लङ्—	अगृह्णात्	अगृह्णीताम्	अगृह्णन्
	अगृह्णाः	अगृह्णीतम्	अगृह्णीत
	अगृह्णाम्	अगृह्णीव	अगृह्णीम

आत्मनेपद.

अगृह्वीत	अगृह्वाताम्	अगृह्वत
अगृह्वीथाः	अगृह्वाथाम्	अगृह्वीध्वम्
अगृह्वि	अगृह्वीवहि	अगृह्वीमहि

परस्मैपद

Perf. लिट्—	जग्राह	जगृहतुः	जगृहुः
	जग्रहिथ	जगृहथुः	जगृह
	जग्राह	जगृहिव	जगृहिम.

आत्मनेपद

जगृहे	जगृहाते	जगृहिरे
जगृहिषे	जगृहाथे	जगृहिध्वे
जगृहे	जगृहिवहे	जगृहिमहे

Aor. लुङ्—अग्रहीत्-अग्रहीष्ट. अग्रहीः-अग्रहीष्ठाः. अग्रहीषम्-अग्रहीषि. Fu. ऌट्—ग्रहीष्यति-ग्रहीष्यते. Per Fu. लुट्—ग्रहीता. Con. ऌङ्—अग्रहीष्यत्-अग्रहीष्यत. Ben. आशिषि लिङ्—गृह्यात्-ग्रहीषीष्ट. Pas. कर्मणि—गृह्यते, Aor. कर्म·लुङ्—अग्राहि. Cau. णिजन्त—ग्राहयति-ते, Aor. णिच्·लुङ्—अजिग्रहत्-त. Des. सनन्त—जिघृक्षति-ते. Fre. यङन्त—जरीगृह्यते. PP. निष्ठा—गृहीतः. IP. क्त्वा—गृहीत्वा. Inf. तुमुन्—ग्रहीतुम्.

ग्लै—भ्वा P. अ. हर्षक्षये, to droop, to be weary. Pre. लट्—ग्लायति. Pot. विधिलिङ्—ग्लायेत्. Imp. लोट्—ग्लायतु. Impf. लङ्—अग्लायत्. Perf. लिट्—

जग्लौ	जग्लतुः	जग्लुः
जग्लाथ } जग्लिथ }	जग्लथुः	जग्ल
जग्लौ	जग्लिव	जग्लिम

Aor. लुङ्—अग्लासीत्	अग्लासिष्टाम्	अग्लासिषुः
अग्लासीः	अग्लासिष्टम्	अग्लासिष्ट
अग्लासिषम्	अग्लासिष्व	अग्लासिष्म

Fu. लृट्—ग्लास्यति. Per Fu. लुट्—ग्लाता. Con. लृङ्—अग्लास्यत्. Ben. आशिषि लिङ्—ग्लायात्-ग्लेयात्. Pas. कर्मणि—ग्लायते, Aor. कर्म-लुङ्—अग्लायि. Cau. णिजन्त—ग्लपयति-ते, ग्लापयति-ते, Aor. णिच्-लुङ्—अजिग्लपत्. Des. सनन्त—जिग्लासति. Fre. यङन्त—जाग्लायते. Kri. कृत्य—ग्लातव्यः, ग्लानीयः, ग्लेयः. PP. निष्ठा—ग्लानः. IP. क्त्वा—ग्लात्वा, प्रग्लाय. Inf. तुमुन्—ग्लातुम्. अनुपसर्गाद्वा णिचि ह्रस्वो वा.

घ

घुष्—(घुषिर्)—भ्वा P. से. अविशब्दने. विशब्दनं प्रतिज्ञानं तच्च शब्देन स्वाभिप्रायप्रकाशनम्. अस्माद् अस्मिन्नर्थे यथाप्रयोगं घुषिर् इति धातुर्वर्त्तते. शब्दमात्रे, to sound, to declare. Pre. लट्—घोषति. Pot. विधिलिङ्—घोषेत्. Imp. लोट्—घोषतु. Impf. लङ्—अघोषत्. Perf. लिट्—जुघोष. Aor. लुङ्—अघोषीत्-अघुषत्, अघोषिष्टाम्-अघुषताम्. Fu. ऌट्—घोषिष्यति. Per Fu. लुट्—घोषिता. Con. ॡङ्—अघोषिष्यत्. Ben. आशिषि लिङ्—घुष्यात्. Pas. कर्मणि—घुष्यते, Aor. कर्म-लुङ्—अघोषि. Cau. णिजन्त—घोषयति, Aor. णिच्-लुङ्—अजूघुषत्. Des. सनन्त—जुघुषिषति-जुघोषिषति. Fre. यङन्त—जोघुष्यते. Kri. कृत्य—घोषितव्यः, घोषणीयः. PP. निष्ठा—घुष्टा रज्जुः (अविशब्दनार्थे). घुषितं वाक्यम् (शब्देन प्रकटीकृताभिप्रायम्). with सम्—संघुष्टः, संघुषितः. IP. क्त्वा—घुषित्वा-घोषित्वा. Inf. तुमुन्—घोषितुम्. अविशब्दनार्थे निष्ठायामनिट्; संपूर्वश्चेद् वा इट्.

घुष् (घुषिर्)—चुरा U. से. अविशब्दने, to proclaim aloud. Pre. लट्—घोषयति-ते. Perf. लिट्—घोषयां चकार-चक्रे-आस-बभूव. Aor. लुङ्—अजूघुषत्-त. Fu. ऌट्—घोषयिष्यति-ते. Per Fu. लुट्—घोषयिता. Con. ॡङ्—अघोषयिष्यत्-त. Ben. आशिषि लिङ्—घुष्यात्-

घोषयिषीष्ट. Des. सनन्त—जुघुषयिषति-ते. Inf. तुमुन्—घोषयितुम्. चौरादिकस्य घुषिर्-धातोर्निष्ठायामिट्, निष्ठा—घुषितः,-अवघुषितम्.

घ्रा—भ्वा P. अ. गन्धोपादाने, to smell, to perceive odour. Pre. लट्—

	जिघ्रति	जिघ्रतः	जिघ्रन्ति
	जिघ्रसि	जिघ्रथः	जिघ्रथ
	जिघ्रामि	जिघ्रावः	जिघ्रामः
Pot. विधिलिङ्—	जिघ्रेत्	जिघ्रेताम्	जिघ्रेयुः
	जिघ्रेः	जिघ्रेतम्	जिघ्रेत
	जिघ्रेयम्	जिघ्रेव	जिघ्रेम
Imp. लोट्—	जिघ्रतु.	जिघ्र.	जिघ्राणि.
Impf. लङ्—	अजिघ्रत्.	अजिघ्रः,	अजिघ्रम्.
Perf. लिट्—	जघ्रौ	जघ्रतुः	जघ्रुः
	जघ्रिथ जघ्राथ	जघ्रथुः	जघ्र
	जघ्रौ	जघ्रिव	जघ्रिम.
Aor. लुङ्—	अघ्रात् अघ्रासीत्	अघ्राताम् अघ्रासिष्टाम्	अघ्रुः अघ्रासिषुः
	अघ्राः अघ्रासीः	अघ्रातम् अघ्रासिष्टम्	अघ्रात अघ्रासिष्ट
	अघ्राम् अघ्रासिषम्	अघ्राव अघ्रासिष्व	अघ्राम अघ्रासिष्म

Fu. ऌट्—घ्रास्यति. Per Fu. लुट्—घ्राता. Con. ऌङ्—अघ्रास्यत्. Ben. आशिषि लिङ्—घ्रायात्-घ्रेयात्. Pas. कर्मणि—घ्रायते, Aor. कर्म-लुङ्—अघ्रायि. Cau. णिजन्त—घ्रापयति-ते, Aor. णिच्-लुङ्—अजिघ्रपत्-त, अजिघ्रिपत्-त. Des. सनन्त—जिघ्रासति. Fre. यङन्त—जेघ्रीयते. PP. निष्ठा—घ्रातः-घ्राणः. IP. क्त्वा—घ्रात्वा-आघ्राय. Inf. तुमुन्—घ्रातुम्.

च

चकास्—अदा P. से. दीप्तौ, to shine.

Pre. लट्—	चकास्ति	चकास्तः	चकासति
	चकास्सि	चकास्थः	चकास्थ
	चकास्मि	चकास्वः	चकास्मः
Pot. विधिलिङ्—	चकास्यात्	चकास्याताम्	चकास्युः
Imp. लोट्—	चकास्तु	चकास्ताम्	चकासतु
	चकाधि	चकास्तम्	चकास्त
	चकासानि	चकासाव	चकासाम

धि च-इतिसलोपे चकाधि इति. यथा तु भाष्यं तथा चकाधि इत्येव भवितव्यम्.

Impf. लङ्—	अचकात्, अचकाद्	अचकास्ताम्	अचकासुः
	अचकाः, अचकात्-द्	अचकास्तम्	अचकास्त
	अचकासम्	अचकास्व	अचकास्म

Perf. लिट्— चकासांचकार, चकासामास, चकासांबभूव.

Aor. लुङ्—	अचकासीत्	अचकासिष्टाम्	अचकासिषुः
	अचकासीः	अचकासिष्टम्	अचकासिष्ट
	अचकासिषम्	अचकासिष्व	अचकासिष्म

Fu. लृट्—चकासिष्यति. Per. Fu. लुट्—चकासिता. Con. लृङ्—अचकासिष्यत्. Ben. आशिषि लिङ्—चकास्यात्, चकास्यास्ताम्. Pas. भावे—चकास्यते, Aor. भावे-लुङ्—अचकासि. Cau. णिजन्त—चकासयति, Aor. णिच्-लुङ्—अचीचकासत्-अचचकासत्. Des. सनन्त—चिचकासिषति. PP. निष्ठा—चकासितः. IP. क्त्वा—चकासित्वा. Inf. तुमुन्—चकासितुम्.

चक्ष्—(चक्षिङ्)—अदादि—A. अ. व्यक्तायां वाचि, दर्शनेऽपि. अयं धातुः प्रायेण आ-(आङ्) पूर्वः. to speak, to say, to see.

Pre. लट्—	आचष्टे	आचक्षाते	आचक्षते
	आचक्षे	आचक्षाथे	आचड्ढ्वे
	आचक्षे	आचक्ष्वहे	आचक्ष्महे.

Pot. विधिलिङ्—	आचक्षीत	आचक्षीयाताम्	आचक्षीरन्
	आचक्षीथाः	आचक्षीयाथाम्	आचक्षीध्वम्
	आचक्षीय	आचक्षीवहि	आचक्षीमहि

Imp. लोट्—	आचष्टाम्	आचक्षाताम्	आचक्षताम्
	आचक्ष्व	आचक्षाथाम्	आचड्ढ्वम्
	आचक्षै	आचक्षावहै	आचक्षामहै

Impf. लङ्—	आचष्ट	आचक्षाताम्	आचक्षत
	आचष्ठाः	आचक्षाथाम्	आचड्ढ्वम्
	आचक्षि	आचक्ष्वहि	आचक्ष्महि

लिटि परे चक्षिङ्धातोः स्थाने ख्या (ख्याञ्) आदेशः ख्शा (ख्शाञ्) आदेशश्च वा भवतः ।

Perf. लिट्—चक्ष्—

3rd. Pers. प्रथम-पुरुष.	आचचक्षे	आचचक्षाते	आचचक्षिरे
2nd. Pers. मध्यम-पुरुष.	आचचक्षिषे	आचचक्षाथे	आचचक्षिध्वे
1st. Pers. उत्तमपुरुष.	आचचक्षे	आचचक्षिवहे	आचचक्षिमहे

ख्या-आदेश उभयपदी.

परस्मैपद—	आचख्यौ	आचख्यतुः	आचख्युः
	आचख्यिथ / आचख्याथ	आचख्यथुः	आचख्य
	आचख्यौ	आचख्यिव	आचख्यिम
आत्मनेपद—	आचख्ये	आचख्याते	आचख्यिरे
	आचख्यिषे	आचख्याथे	आचख्यिध्वे
	आचख्ये	आचख्यिवहे	आचख्यिमहे

ख्शा (ख्शाञ्)-आदेश उभयपदी.

परस्मैपद— आचक्शौ आचक्शतुः आचक्शुः
आचक्शिथ } आचक्शथुः आचक्श
आचक्शाथ }
आचक्शौ आचक्शिव आचक्शिम

आत्मनेपद.

आचक्शे	आचक्शाते	आचक्शिरे
आचक्शिषे	आचक्शाथे	आचक्शिध्वे
आचक्शे	आचक्शिवहे	आचक्शिमहे

लुङ्-लृट्-लुट्-लृङि आशिषि लिङि च परे चक्षिङ्-धातोः स्थाने नित्यमेव ख्या (ख्याञ्) आदेशः क्शा (क्शाञ्) चादेशश्च भवतः, वर्जनार्थे तु एतौ आदेशौ न स्तः. Aor. लुङ्—अख्यत्-अख्यत, अक्शासीत्-अक्शास्त. वर्जनार्थेतु, अचक्षिष्ट. Fu. लृट्—ख्यास्यति-ख्यास्यते, क्शास्यति-ते. Per Fu. लुट्—ख्याता-क्शाता. Con. लृङ्—अख्यास्यत्-त, अक्शास्यत्-त. Ben. आशिषि लिङ्—ख्यायात्-ख्येयात्-ख्यासीष्ट, क्शायात्-क्शेयात्-क्शासीष्ट. Pas. ख्यायते-क्शायते. Aor. लुङ्—अख्यायि. Cau. णिजन्त—ख्यापयति--ते, क्शापयति-ते, Aor. णिच्-लुङ्—अचिख्यपत्-अचिक्शपत्. Des. सनन्त—चिख्यासति-ते, चिक्शासति-ते. Fre. यङन्त—चाख्यायते-चाक्शायते. PP. निष्ठा—ख्यातः. Inf. तुमुन्—ख्यातुम्.

चट्---भ्वा P. से. भेदने, to break. Pre. लट्—चटति. Perf. लिट्—चचाट. Aor. लुङ्—अचटीत्.

10

Fu. ऌट्—चटिष्यति. Per Fu. लुट्—चटिता. PP. निष्ठा—चटितः. IP. क्त्वा—चटित्वा. Inf. तुमुन्—चटितुम्.

चम्—भ्वा P. से. अदने, to eat. Pre. लट्—चमति, but after the prep.—आ, आचामति. Pot. विधि-लिङ्—आचामेत्. Imp. लोट्—आचामतु. Impf. लङ्—आचामत्. Perf. लिट्—चचाम, चेमतुः, चेमुः. चेमिथ—चचमिथ. चचाम. Aor. लुङ्—अचमीत्. Fu. ऌट्—चमिष्यति. Per Fu. लुट्—चमिता. Pas. कर्मणि—चम्यते, Aor. कर्म-लुङ्—अचामि. Cau. णिजन्त—चामयति, Aor. णिच्-लुङ्—अचीचमत्-त. Des. सनन्त—चिचमिषति. Kri. कृत्य—आ + चम् = आचमनीयः. PP. निष्ठा—चान्तः. IP. क्त्वा—चान्त्वा, चमित्वा. Inf. तुमुन्—चमितुम्.

चर्—भ्वा P. से. गतौ, to walk. Pre. लट्—चरति. Perf. लिट्—चचार. Aor. लुङ्—अचरीत्. Fu. ऌट्—चरिष्यति. Per Fu. लुट्—चरिता. Con. ऌङ्—अचरिष्यत्. Ben. आशिषि-लिङ्—चर्यात्. Pas. कर्मणि—चर्यते, Aor. कर्म-लुङ्—अचारि. Cau. णिजन्त—चारयति. Des. सनन्त—चिचरिषति. PP. निष्ठा—चरितः. Inf. तुमुन्—चरितुम्. With—आ, Kri. कृत्य—आचरणीयः.

चल्—भ्वा P. से. कम्पने, to shake, to go. Pre. लट्—चलति. Perf. लिट्—चचाल. Aor. लुङ्—अचालीत्. Fu. ऌट्—चलिष्यति. Per Fu. लुट्—चलिता. Con. ऌङ्—अचलिष्यत्. Ben. आशिषि-लिङ्—चल्यात्.

Pas. कर्मणि—चल्यते, Aor. कर्म-लुङ्—अचालि. Cau. णिजन्त (कम्पनार्थे)—चलयति-ते. (अन्यार्थे) चालयति-ते. Des. सनन्त—चिचलिषति. PP. निष्ठा—चलितः. Inf. तुमुन्—चलितुम्.

चि—स्वा U. अ. चयने, to collect. Pre. लट्—चिनोति-चिनुते. Pot. विधिलिङ्—चिनुयात्-चिन्वीत. Imp. लोट्—चिनोतु-चिनुताम्. Impf. लङ्—अचिनोत्-अचिनुत. Perf. लिट्—चिकाय-चिचाय, चिक्ये-चिच्ये. Aor. लुङ्—अचैषीत्-अचेष्ट. Fu. लृट्—चेष्यति-ते. Per Fu. लुट्—चेता. Con. लृङ्—अचेष्यत्-त. Ben. आशिषि-लिङ्—चीयात्-चेषीष्ट. Pas. कर्मणि—चीयते, Aor. कर्म-लुङ्—अचायि. Cau. णिजन्त—चापयति, चाययति, Aor. णिच्-लुङ्—अचीचपत्-अचीचयत्. Des. सनन्त—चिचीषति-ते, चिकीषति-ते. Fre. यङन्त—चेचीयते. Kri. कृत्य—चेतव्यः, चयनीयः, चेयः. PP. निष्ठा—चितः. IP. क्त्वा—चित्वा. Inf. तुमुन्—चेतुम्.

चित्—भ्वा P. से. संज्ञाने, to think. Pre. लट्—चेतति. Pot. विधिलिङ्—चेतेत्. Imp. लोट्—चेततु. Impf. लङ्—अचेतत्. Perf. लिट्—चिचेत, चिचिततुः. चिचेतिथ, चिचितथुः. चिचेत, चिचितिव. Aor. लुङ्—अचेतीत्. अचेतीः. अचेतिषम्. Fu. लृट्—चेतिष्यति. Per Fu. लुट्—चेतिता. Con. लृङ्—अचेतिष्यत्. Ben. आशिषि लिङ्—चित्यात्. Pas. कर्मणि—चित्यते. Aor. कर्म-लुङ्—अचेति. Cau. णिजन्त—चेतयति. Aor. णिच्-

लुङ्—अचीचितत्. Des. सनन्त—चिचेतिषति. Fre. यङन्त—चेचित्यते. Kri. कृत्य—चेतितव्यः, चेतनीयः, चेत्यः. PP. निष्ठा—चित्तः. IP. क्त्वा—चेतित्वा, चितित्वा. Inf. तुमुन्—चेतितुम्.

चिन्त्—(चिति)—चुरा U. से. चिन्तायाम्, to think, to remember. Pre. लट्—चिन्तयति-ते, चिन्तति. Pot. विधिलिङ्—चिन्तयेत्-त, चिन्तेत्. Imp. लोट्—चिन्तयतु-ताम्, चिन्ततु. Impf. लङ्—अचिन्तयत्-त, अचिन्तत्. Perf. लिट्—चिन्तयां चकार-चक्रे-आस-बभूव, चिचिन्त. Aor. लुङ्—अचिचिन्तत्-त, अचिन्तीत्. Fu. ऌट्—चिन्तयिष्यति-ते, चिन्तिष्यति. Per Fu. लुट्—चिन्तयिता, चिन्तिता. Ben. आशिषि-लिङ्—चिन्त्यात्-चिन्तयिषीष्ट. Pas. कर्मणि—चिन्त्यते. Aor. कर्म-लुङ्—अचिन्ति. Des. सनन्त—चिचिन्तयिषति-ते, चिचिन्तिषति. Kri. कृत्य—चिन्तयितव्यः, चिन्तितव्यः, चिन्तनीयः. PP. निष्ठा—चिन्तितः. IP. क्त्वा—चिन्तयित्वा. Inf. तुमुन्—चिन्तयितुम्-चिन्तितुम्.

चुद्—चुरा U. से. प्रेरणे, to drive. जिज्ञासार्थे द्विकर्मकः. देवदत्तम् अर्थं चोदयति. Pre. लट्—चोदयति-ते. Perf. लिट्—चोदयांचकार-चक्रे-आस-बभूव. Aor. लुङ्—अचूचुदत्-त. Fu. ऌट्—चोदयिष्यति-ते. Per Fu. लुट्—चोदयिता. PP. निष्ठा—चोदितः. Inf. तुमुन्—चोदयितुम्.

चुम्ब्—(चुबि) भ्वा P. से. चुम्बने, to kiss. Pre. लट्—चुम्बति. Perf. लिट्—चुचुम्ब. Aor. लुङ्—अचुम्बीत्.

Per Fu. लुट्—चुम्बिता. Pas. कर्मणि—चुम्ब्यते. Cau. णिजन्त—चुम्बयति. PP. निष्ठा—चुम्बितः. IP. क्त्वा—चुम्बित्वा. Inf. तुमुन्—चुम्बितुम्.

चुर्—चुरा U. से. स्तेये, to steal or rob. Pre. लट्—चोरयति-ते. Perf. लिट्—चोरयां-चकार-चक्रे-आस-बभूव. Aor.—लुङ्—अचूचुरत्-त. Fu. लृट्—चोरयिष्यति-ते. Ben आशिषि लिङ्—चोर्यात्, चोरयिषीष्ट. Pas. कर्मणि—चोर्यते, Aor. कर्म-लुङ्—अचोरि. Des. सनन्त—चुचोरयिषति-ते. PP. निष्ठा—चोरितः. IP. क्त्वा—चोरयित्वा. Inf. तुमुन्—चोरयितुम्.

चूर्ण्—चुरा U. से, संचूर्णने, to crush, to powder. Pre. लट्—चूर्णयति-ते. Perf. लिट्—चूर्णयांचकार-चक्रे-आस-बभूव. Aor. लुङ्—अचुचूर्णत्-त. Fu. लृट्—चूर्णयिष्यति-ते. PP. निष्ठा—चूर्णितः. IP. क्त्वा—चूर्णयित्वा. Inf. तुमुन्—चूर्णयितुम्.

चेष्ट्—भ्वा A. से. चेष्टायाम्, to stir. Pre. लट्—चेष्टते. Perf. लिट्—चिचेष्टे. Aor. लुङ्—अचेष्टिष्ट. Per Fu. लुट्—चेष्टिता. Ben. आशिषि लिङ्—चेष्टिषीष्ट. Pas. भावे—चेष्ट्यते. Cau. णिजन्त—चेष्टयति. Des. सनन्त—चिचेष्टिषते. PP. निष्ठा—चेष्टितः. IP. क्त्वा—चेष्टित्वा. Inf. तुमुन्—चेष्टितुम्.

च्यु—भ्वा A. अ. गतौ, to go. to drop down. Pre. लट्—च्यवते. Pot. विधिलिङ्—च्यवेत. Imp.

लोट्—च्यवताम्. Impf. लङ्—अच्यवत. Perf. लिट्—चुच्युवे. चुच्युविषे. Aor. लुङ्—अच्योष्ट. Fu. लृट्—च्योष्यते. Per Fu. लुट्—च्योता. Con. लृङ्—अच्योष्यत. Ben. आशिषि-लिङ्—च्योषीष्ट. Pas. कर्मणि—च्यूयते. Cau. णिजन्त—च्यावयति. Aor. णिच्-लुङ्—अचुच्यवत्, अचिच्यवत्. Des. सनन्त—चुच्यूषते. Fre. यङन्त—चोच्यूयते. PP. निष्ठा—च्युतः. Inf. तुमुन्—च्योतुम्.

च्युत्---(च्युतिर्)—भ्वा P. से. आसेचने, to sprinkle. Pre. लट्—च्योतति. Perf. लिट्—चुच्योत, चुच्युततुः. चुच्योतिथ, चुच्युतथुः. चुच्योत, चुच्युतिव. Aor. लुङ्—अच्युतत्-अच्योतीत्. Fu. लृट्—च्योतिष्यति. Per Fu. लुट्—च्योतिता. Con. लृङ्—अच्योतिष्यत्. Ben. आशिषि-लिङ्—च्युत्यात्. Pas. कर्मणि—च्युत्यते. Aor. कर्म-लुङ्—अच्योति. Cau. णिजन्त—च्योतयति. Aor. णिच्-लुङ्—अचुच्युतत्. Des. सनन्त—चुच्योतिषति-चुच्युतिषति. Fre. यङन्त—चोच्युत्यते. PP. निष्ठा—च्युतितः. IP. क्त्वा—च्योतित्वा-च्युतित्वा. Inf. तुमुन्—च्योतितुम्.

छ

छद्—चुरा U. से. अपवारणे, to cover, to conceal. Pre. लट्—छादयति-ते, छदति-छदते. Perf. लिट्—छादयांचकार-चक्रे-आस-बभूव, चच्छाद-चच्छदे. Aor. लुङ्—अचिच्छदत्-त, अच्छादीत्-अच्छदीत्-अच्छदिष्ट. Fu. लृट्—छादयिष्यति-ते, छदिष्यति-ते. Per Fu. लुट्—छादयिता-छदिता. Con. लृङ्—अच्छादयिष्यत्-त, &c. Ben. आशिषि-लिङ्—छाद्यात्-छादयिषीष्ट, छद्यात्-छदिषीष्ट. Pas. कर्मणि—छाद्यते, Aor. कर्म-लुङ्—अच्छादि. Des. सनन्त—चिच्छादयिषति-ते. Kri. कृत्य—छादयितव्यः. PP. निष्ठा—छादितः-छन्नः. IP. क्त्वा—छादयित्वा. Inf. तुमुन्—छादयितुम्.

छिद्—(छिदिर्)—रुधा U. अ. द्वैधीकरणे, to cut. Pre. लट्—छिनत्ति-छिन्ते. Pot. विधिलिङ्—छिन्द्यात्, छिन्दीत. Imp. लोट्—छिनत्तु-छिन्ताम्. छिन्धि-छिन्त्स्व. छिनदानि-छिनदै. Impf. लङ्—अच्छिनत्-अच्छिन्त. अच्छिनः-अच्छिनत्-अच्छिन्थाः. अच्छिनदम्-अच्छिन्दि. Perf. लिट्—चिच्छेद-चिच्छिदे. चिच्छेदिथ-चिच्छिदिषे. चिच्छेद-चिच्छिदे. Aor. लुङ्—अच्छिदत्-अच्छैत्सीत्, अच्छित्त. Fu. लृट्—छेत्स्यति-छेत्स्यते. Per Fu. लुट्—छेत्ता. Con. लृङ्—अच्छेत्स्यत्-त. Ben. आशिषि-लिङ्—छिद्यात्-छित्सीष्ट. Pas. कर्मणि—छिद्यते.

Aor. कर्म-लुङ्—अच्छेदि. Cau. णिजन्त—छेदयति-ते. Aor. णिच्-लुङ्—अचिच्छिदत्-त. Des. सनन्त—चिच्छित्सति-चिच्छित्सते. Fre. यङन्त—चेच्छिद्यते. PP. निष्ठा—छिन्नः. IP. क्त्वा—छित्त्वा. Inf. तुमुन्—छेत्तुम्.

छो—दिवा P. अः छेदने, to cut. Pre. लट्—छ्यति. छ्यसि. छ्यामि. Pot. विधि-लिङ्—छ्येत्. छ्येः. छ्येयम्. Imp. लोट्—छ्यतु. Impf. लङ्—अच्छ्यत्. Perf. लिट्—चच्छौ, चच्छतुः. चच्छिथ-चच्छाथ, चच्छथुः. चच्छौ, चच्छिव. Aor. लुङ्—अच्छात्-अच्छासीत्, अच्छाताम्-अच्छासिष्टाम्, अच्छुः-अच्छासिषुः. अच्छाः-अच्छासीः. अच्छाम्-अच्छासिषम्. Fu. लृट्—छास्यति. Per Fu. लुट्—छाता. Con. लृङ्—अच्छास्यत्. Ben. आशिषि-लिङ्—छायात्. Pas. कर्मणि—छायते. Aor. कर्म-लुङ्—अच्छायि. Cau. णिजन्त—छाययति. Aor. णिच्-लुङ्—अचिच्छयत्. Des. सनन्त—चिच्छासति. Fre. यङन्त—चाच्छायते. PP. निष्ठा—छितः, छातः. IP. क्त्वा—छित्वा, छात्वा. Inf. तुमुन्—छातुम्.

ज

जक्ष्—अदा P. से. भक्षणहसनयोः, to eat, to laugh.

Pre. लट्—जक्षिति, जक्षितः, जक्षति. जक्षिषि, जक्षिथः, जक्षिथ. जक्षिमि, जक्षिवः, जक्षिमः.

Pot. विधि-लिङ्—जक्ष्यात्, जक्ष्याताम्, जक्ष्युः. जक्ष्याः जक्ष्यातम्, जक्ष्यात. जक्ष्याम्, जक्ष्याव, जक्ष्याम.

Imp. लोट्—जक्षितु, जक्षिताम्, जक्षतु. जक्षिहि, जक्षितम्, जक्षित. जक्षाणि, जक्षाव, जक्षाम.

Impf. लङ्—अजक्षत् / अजक्षीत् } अजक्षिताम्, अजक्षुः.
अजक्षः / अजक्षीः } अजक्षितम्, अजक्षित.
अजक्षम्, अजक्षिव, अजक्षिम.

Perf. लिट्—जजक्ष, जजक्षतुः ; जजक्षिथ, जजक्षथुः ; जजक्ष, जजक्षिव. Aor. लुङ्—अजक्षीत्. अजक्षीः. अजक्षिषम्. Fu. लृट्—जक्षिष्यति. Per Fu. लुट्—जक्षिता. Con. लृङ्—अजक्षिष्यत्. Ben. आशिषि-लिङ्—जक्ष्यात्, जक्ष्यास्ताम्. Pas. कर्मणि—जक्ष्यते. Aor. कर्म-लुङ्—अजक्षि. Cau. णिजन्त—जक्षयति, Aor. णिच्-लुङ्—अजजक्षत्. Des. सनन्त—जिजक्षिषति. Fre. यङन्त—जाजक्ष्यते. Kri. कृत्य—जक्षितव्यः. PP. निष्ठा—जक्षितः. IP. क्त्वा—जक्षित्वा. Inf. जक्षितुम्.

जन्—(जनी) दिवा A. से. प्रादुर्भावे, प्रादुर्भाव उत्पत्तिरभिव्यक्तिर्वा. अत्रायम् अकर्मकः, यदा तु अन्तर्भावितण्यर्थ उत्पादनायाम् अभिव्यञ्जनायां वा वर्त्तते तदा सकर्मकः.

'अजा ह्यग्नेरजनिष्ट गर्भम्'

to be born, to spring up. Pre. लट्—जायते. Pot. विधिलिङ्—जायेत. Imp. लोट्—जायताम्. जायस्व. जायै. Impf. लङ्—अजायत. Perf. लिट्—जज्ञे, जज्ञाते, जज्ञिरे. जज्ञिषे, जज्ञाथे. जज्ञे, जज्ञिवहे. Aor. लुङ्—अजनि-अजनिष्ट, अजनिषाताम्. अजनिष्ठाः, अजनिषाथाम्. अजनिषि, अजनिष्वहि. Fu. लृट्—जनिष्यते. Per Fu. लुट्—जनिता. Con. लृङ्—अजनिष्यत. Ben. आशिषिलिङ्—जनिषीष्ट. Pas. भावे—जायते, जन्यते. Aor. भावेलुङ्—अजनि. Cau. णिजन्त—जनयति. Aor. णिच्लुङ्—अजीजनत् (ण्यन्तात् कर्मणि—Pre. जन्यते-जायते Aor—अजनि-अजानि). Des. सनन्त—जिजनिषते. Fre. यङन्त—जाजायते-जञ्जन्यते, Kri. कृत्य—जन्यः, जननीयम्. PP. निष्ठा—जातः. IP. क्त्वा—जनित्वा. Inf. तुमुन्—जनितुम्. शृङ्गाच्छरो जायते.

जन्—जुहु P. से. जनने, to be born. Pre. लट्—जजन्ति, जजातः, जज्ञति. जजंसि, जजाथः, जजाथ. जजन्मि, जजन्वः. Pot. विधिलिङ्—जजन्यात्-जजायात्. Imp. लोट्—जजन्तु, Perf. लिट्—जजान. Fu. लृट्—जनिष्यति, इत्यादि.

जप्—भ्वा P. से, व्यक्तायां वाचि, to speak ; **मानसे च**, to mutter. Pre. लट्—जपति. Impf. लङ्—अजपत्. Perf. लिट्—जजाप, जेपतुः. Aor. लुङ्—अजपीत्-अजापीत्. Fu. लृट्—जपिष्यति, Per Fu. लुट्—जपिता. Con. लृङ्—अजपिष्यत्. Ben. आशिषि-लिङ्—जप्यात्. Pas. कर्मणि—जप्यते. Aor. कर्म-लुङ्—अजापि. Cau. णिजन्त—जापयति. Aor. णिच्-लुङ्—अजीजपत्. Des. सनन्त—जिजपिषति. Fre. यङन्त—जञ्जप्यते. PP. निष्ठा—जपितः. IP. क्त्वा—जपित्वा. Inf. तुमुन्—जपितुम्.

जल्प्—भ्वा P. से. व्यक्तायां वाचि, to prattle, to speak. Pre. लट्—जल्पति. Perf. लिट्—जजल्प. Aor. लुङ्—अजल्पीत्. Fu. लृट्—जल्पिष्यति. Per Fu. लुट्—जल्पिता. Ben. आशिषि-लिङ्—जल्प्यात्. Pas. कर्मणि—जल्प्यते. Aor. कर्म-लुङ्—अजल्पि. Cau. णिजन्त—जल्पयति पुत्रं देवदत्तं यज्ञदत्तः. Aor. णिच्-लुङ्—अजजल्पत्. Des. सनन्त—जिजल्पिषति. PP. निष्ठा—जल्पितः. Inf. तुमुन्—जल्पितुम्.

जागृ—अदा P. से, निद्राक्षये, to wake. Pre. लट्—जागर्ति, जागृतः, जाग्रति. जागर्षि, जागृथः, जागृथ. जागर्मि, जागृवः, जागृमः. Pot. विधि-लिङ्—जागृयात्. जागृयाः. जागृयाम्. Imp, लोट्—जागर्तु, जागृताम्, जाग्रतु. जागृहि. जागराणि. Impf. लङ्—अजागः, अजागृताम्, अजागरुः. अजागः. अजागरम्. Perf. लिट्—जागरांचकार-जजागार, जागरांचक्रतुः-जजागरतुः, जागरां-

चक्रुः-जजागरुः. जागरांचकर्थ-जजागरिथ, जागरांचक्रथुः-जजागरथुः, जागरांचक्र-जजागर. जागरांचकार-जजागार-जजागर, जागरांचकृव-जजागरिव, जागरांचकृम-जजागरिम. Aor. लुङ्—अजागरीत्. अजागरीः, अजागरिषम्. Fu. लृट्—जागरिष्यति. Per Fu. लुट्—जागरिता. Con. लृङ्—अजागरिष्यत्. Ben. आशिषि-लिङ्—जागर्यात्. जागर्याः. जागर्यासम्. Pas. भावे—जागर्यते. Aor. कर्म-लुङ्—अजागारि. Cau. णिजन्त—जागरयति. Aor. णिच्-लुङ्—अजजागरत्. Des. सनन्त—जिजागरिषति. PP. निष्ठा—जागरितः. IP. क्त्वा—जागरित्वा. Inf. तुमुन्—जागरितुम्.

जि—भ्वा P. अ. जयेऽर्थे—जय उत्कर्षप्राप्तिः. अत्र अकर्मकः, to excel. Pre. लट्—जयति. Pot. विधि-लिङ्—जयेत्. Imp. लोट्—जयतु. Impf. लङ्—अजयत्. Perf. लिट्—जिगाय, जिग्यतुः. जिगयिथ-जिगेथ. जिगाय, जिग्यिव. Aor. लुङ्—अजैषीत्. अजैषीः. अजैषम्. Fu. लृट्—जेष्यति. Per Fu. लुट्—जेता. Con. लृङ्—अजेष्यत्. Ben. आशिषि-लिङ्—जीयात्. Pas. भावे—जीयते. Aor. भावे-लुङ्—अजायि. Cau. णिजन्त—जापयति. Aor. णिच्-लुङ्—अजीजपत्. Des. सनन्त—जिगीषति. Fre. यङन्त—जेजीयते. Kri. कृत्य—जेतव्यः. PP. निष्ठा—जितः. IP. क्त्वा—जित्वा. Inf. तुमुन्—जेतुम्.

with परा = पराजयते ॥
with वि = विजयते ॥

जयिर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ।
उत्कर्षप्राप्तिराद्योऽर्थौ द्वितीयेऽर्थे सकर्मकः ॥

जि—भ्वा P. से. to conquer (अभिभवेऽर्थे = अभिभवो न्यूनीकरणम्) सर्वं जयतिवत्. अध्ययनात् पराजयते (पराजिरत्र न्यूनीभावार्थे) अध्येतुं ग्लायति इत्यर्थः.

जीव्—भ्वा P. से. प्राणधारणे, to live. Pre. लट्—जीवति. Pot. विधि-लिङ्—जीवेत्. Imp. लोट्—जीवतु. जीव. जीवानि. Impf. लङ्—अजीवत्. Perf. लिट्—जिजीव. Aor. लुङ्—अजीवीत्. Fu. लृट्—जीविष्यति. Per Fu. लुट्—जीविता. Con. लृङ्—अजीविष्यत्. Ben. आशिषि-लिङ्—जीव्यात्. Pas. भावे—जीव्यते. Cau. णिजन्त—जीवयति. Aor. णिच्-लुङ्—अजिजीवत्-अजीजिवत्. Des. सनन्त—जिजीविषति. Fre. यङन्त—जेजीव्यते. Kri. कृत्य—जीवितव्यम्. PP. निष्ठा—जीवितः. IP. क्त्वा—जीवित्वा, उपजीव्य. Inf. तुमुन्—जीवितुम्.

जृम्भ्—(जृभि)—भ्वा A. से. गात्रविनामे, to yawn. Pre. जृम्भते. Pot. विधि-लिङ्—जृम्भेत. Imp. लोट्—जृम्भताम्. Impf. लङ्—अजृम्भत. Perf. लिट्—जजृम्भे. Aor. लुङ्—अजृम्भिष्ट. Fu. लृट्—जृम्भिष्यते, Per Fu. लुट्—जृम्भिता. Con. लृङ्—अजृम्भिष्यत. Ben. आशिषि-लिङ्—जृम्भिषीष्ट. Pas. भावे—जृम्भ्यते. Aor. भावे-लुङ्—अजृम्भि. Cau. णिजन्त—जृम्भयति. Aor. णिच्-लुङ्—अजजृम्भत्. Des. सनन्त—जिजृम्भिषते. PP. निष्ठा—जृम्भितः. Inf. तुमुन्—जृम्भितुम्.

जॄ—(जॄष्) दिवा P. से. वयोहानौ, to grow old. Pre. लट्—जीर्यति, जीर्यतः. जीर्यसि. जीर्यामि. Pot. विधिलिङ्—जीर्येत्. Imp. लोट्—जीर्यतु. Impf. लङ्—अजीर्यत्. Perf. लिट्—जजार, जजरतुः-जेरतुः, जजरुः-जेरुः. जजरिथ-जेरिथ, जजरथुः-जेरथुः, जजर-जेर. जजार-जजर, जजरिव-जेरिव, जजरिम-जेरिम. Aor. लुङ्—अजारीत्-अजरत्, अजारिष्टाम्-अजरताम्. अजारीः-अजरः. अजारिषम्-अजरम्. Fu. ऌट्—जरिष्यति-जरीष्यति. Per Fu. लुट्—जरिता-जरीता. Con. ऌङ्—अजरिष्यत्-अजरीष्यत्. Ben. आशिषि-लिङ्—जीर्यात्. Pas. भावे—जीर्यते. Aor. भावे-लुङ्—अजारि. Cau. णिजन्त—जरयति, Aor. णिच्-लुङ्—अजीजरत्. Des. सनन्त—जिजीर्षति-जिजरिषति-जिजरीषति. Fre. यङन्त—जेजीर्यते. PP. निष्ठा—जीर्णः. IP. क्त्वा—जरित्वा-जरीत्वा, Inf. तुमुन्—जरितुम्-जरीतुम्.

जॄ—क्र्या P. से. to grow old. Pre. लट्—जृणाति.

जॄ—चुरा P. से. to grow old. Pre. लट्—जारयति or जरति. Perf. लिट्—जारयांचकार. Per Fu. लुट्—जारयिता.

निरनुबन्धकजॄधातुर्नास्तीति सिद्धान्तः.

ज्ञा—क्र्या P. अ. अवबोधने, to know. Pre. लट्—जानाति, जानीतः, जानन्ति. जानासि, जानीथः, जानीथ.

जानामि, जानीवः. Pot. विधिलिङ्—जानीयात्. जानीयाः. जानीयाम्. Imp. लोट्—जानातु. जानीहि. जानानि. Impf. लङ्—अजानात्, अजानाः, अजानाम्. Perf. लिट्—जज्ञौ, जज्ञतुः, जज्ञुः. जज्ञिथ or जज्ञाथ, जज्ञथुः, जज्ञ. जज्ञौ, जज्ञिव, जज्ञिम. Aor. लुङ्—अज्ञासीत्. अज्ञासीः. अज्ञासिषम्. Fu. ऌट्—ज्ञास्यति. Per Fu लुट्—ज्ञाता. Con. ऌङ्—अज्ञास्यत्. Ben. आशिषि-लिङ्—ज्ञायात्-ज्ञेयात्. ज्ञायाः-ज्ञेयाः. ज्ञायासम्, ज्ञेयासम्. Pas. कर्मणि—ज्ञायते. Aor. कर्म-लुङ्—अज्ञायि. Cau. णिजन्त—ज्ञापयति, Aor. णिच्-लुङ्—अजिज्ञपत्. Des. सनन्त—जिज्ञासते. Fre. यङन्त—जाज्ञायते. Kri. कृत्य—ज्ञातव्यः. PP. निष्ठा—ज्ञातः. IP. क्त्वा—ज्ञात्वा. Inf. तुमुन्—ज्ञातुम्.

अप + ज्ञा = अपजानीते, शतमपजानीते (अपलपति इत्यर्थः)।
सर्पिषो जानीते, अत्र अकर्मकत्वादात्मनेपदम् ॥
सम् + ज्ञा = सञ्जानीते, मात्रा वा मातरं सञ्जानीते।
प्रति + ज्ञा = प्रतिजानीते, शतं प्रतिजानीते ॥
उत्कण्ठापूर्वकस्मरणार्थे तु—
मातुः सञ्जानाति or मात्रा सञ्जानाति or मातरं सञ्जानाति।
एवं प्रति-योगेऽपि ॥

धर्मं जानीते, अत्र क्रियाफलस्य कर्तृगामित्वादात्मनेपदम्।

स्वयं जानाति or जानीते, कर्त्रभिप्रायत्वे उपपदेन द्योत्यमाने तद्विकल्पः ॥

Des. सनन्त—धर्मं जिज्ञासते, अत्र सकर्मकादात्मनेपदम्।

अनु + ज्ञा = अनुजिज्ञासति, सकर्मकात् परस्मैपदम् ॥

औषधस्य अनुजिज्ञासते (औषधेन प्रवर्त्तितुमिच्छति इत्यर्थः), अत्र अकर्मकत्वनिबन्धनादात्मनेपदम् ।

Cau. णिजन्त—मारणार्थे—ज्ञपयति, शत्रुं संज्ञपयति (मारयति इत्यर्थः) ॥

तोषणार्थे—विष्णुं विज्ञपयति (संतोषयति इत्यर्थः) ।
निशामनार्थे—रूपं प्रज्ञपयति (रूपं दर्शयति इत्यर्थः).
बोधनार्थे—ज्ञपयति-ज्ञापयति, तद्-ज्ञापयति आचार्यः ।
Des. सनन्त—जिज्ञपयिषति-ज्ञीप्सति. PP. निष्ठा—ज्ञप्तः-ज्ञापितः. Inf. तुमुन्—ज्ञापयितुम्-ज्ञपयितुम् ॥

ज्ञा—चुरा U. से. नियोगे, अत्र नियोगः प्रेरणम्, to direct, to command. प्रायेणायम् आङ्पूर्वः. Pre. लट्—आज्ञापयति-ते. Pot. विधिलिङ्—आज्ञापयेत्-त. Imp. लोट्—आज्ञापयतु-ताम्. Impf. लङ्—आज्ञापयत्. Perf. लिट्—आज्ञापयां चकार-चक्रे. Aor. लुङ्—आजिज्ञपत्-त. Fu. लृट्—आज्ञापयिष्यति-ते. Per Fu. लुट्—आज्ञापयिता. Con. लृङ्—आज्ञापयिष्यत्-त. Ben.—आशिषि-लिङ्—आज्ञाप्यात्, आज्ञापयिषीष्ट. Pas. कर्मणि—आज्ञाप्यते. Aor. कर्म-लुङ्—आज्ञापि. Cau-Aor. णिच्-लुङ्—आजिज्ञपत्. Des. सनन्त—आजिज्ञपयिषति-ते, ज्ञीप्सति-ते. PP. निष्ठा—ज्ञप्तः-ज्ञापितः. IP. क्त्वा—ज्ञापयित्वा. Inf. तुमुन्—ज्ञापयितुम्.

ज्वर्—भ्वा P. से. रोगे, to be hot with fever or passion, to suffer. Pre. लट्—ज्वरति. Pot. विधि-लिङ्—ज्वरेत्. Imp. लोट्—ज्वरतु. Impf. लङ्—अज्वरत्. Perf.

लिट्—जज्वार. Aor. लुङ्—अज्वारीत्. Fu. लृट्—ज्वरिष्यति. Per Fu. लुट्—ज्वरिता. Con. लृङ्—अज्वरिष्यत्. Ben. आशिषि-लिङ्—ज्वर्यात्. Pas. भावे—ज्वर्यते. Aor. भावे-लुङ्—अज्वारि. Cau. णिजन्त—ज्वरयति. Aor. णिच्-लुङ्—अजिज्वरत्. Des. सनन्त—जिज्वरिषति. Fre. यङन्त—जाज्वर्यते. PP. निष्ठा—जूर्णः. IP. क्त्वा—ज्वरित्वा. Inf. तुमुन्—ज्वरितुम्.

ज्वल्—भ्वा P. से. दीप्तौ, to burn. Pre. लट्—ज्वलति. Perf. लिट्—जज्वाल. जज्वलिथ. जज्वाल. Aor. लुङ्—अज्वालीत्. Fu. लृट्—ज्वलिष्यति. Per Fu. लुट्—ज्वलिता. Con. लृङ्—अज्वलिष्यत्. Ben. आशिषि-लिङ्—ज्वल्यात्. Pas. भावे—ज्वल्यते. Aor. भावे-लुङ्—अज्वालि. Cau. णिजन्त—ज्वलयति-ज्वालयति, (with—उपसर्ग—प्रज्वलयति). Aor. णिच्-लुङ्—अजिज्वलत्. Des. सनन्त—जिज्वलिषति. Fre. यङन्त—जाज्वल्यते. PP. निष्ठा—ज्वलितः. Inf. तुमुन्—ज्वलितुम्.

ड

डी—भ्वा, दिवा A. से. विहायसा गतौ, to fly. Pre. लट्—डयते इति भ्वादिः, डीयते इति दिवादिः, एवं सर्वत्र. Pot. विधि-लिङ्—डयेत-डीयेत. Imp. लोट्—डयताम्-डीयताम्. Impt. लङ्—अडयत-अडीयत. Perf. लिट्—डिड्ये. डिड्यिषे. डिड्ये. Aor. लुङ्—अडयिष्ट. Fu. लृट्—डयिष्यते. Per Fu. लुट्—डयिता. Con. लृङ्—अडयिष्यत. Ben. आशिषि-लिङ्—डयिषीष्ट. Pas. भावे—डीयते. Aor. भावे-लुङ्—अडायि. Cau. णिजन्त—डाययति. Aor. णिच्-लुङ्—अडीडयत्. Des. सनन्त—डिडयिषते. Fre. यङन्त—डेडीयते. PP. निष्ठा—डयितः-डीनः. IP. क्त्वा—डयित्वा. Inf. तुमुन्—डयितुम्. प्रोड्डीनोड्डीनसंडीनान्येताः खगगतिक्रियाः, उत्+डी=उड्डीयते, उड्डीनः, उड्डीयमानः, जालमादाय उड्डीयताम्, डयते गृध्रः, हंसाः प्रडीनाः.

ढ

ढौक्—भ्वा A. से. गतौ, to go, to approach. Pre. लट्—ढौकते. Perf. लिट्—डुढौके. Aor. लुङ्—अढौकिष्ट. Fu. लृट्—ढौकिष्यते. Per Fu. लुट्—ढौकिता. Con. लृङ्—अढौकिष्यत. Ben. आशिषि-लिङ्—ढौकिषीष्ट. Pas. कर्मणि—ढौक्यते. Aor. कर्म-लुङ्—अढौकि. Des. सनन्त—डुढौकिषते. PP. निष्ठा—ढौकितः. Inf. तुमुन्—ढौकितुम्.

त

तक्ष्—(तक्षू) भ्वा P. वे. तनूकरणे, to hew, to cut.

Pre. लट्—	तक्षति	तक्षतः	तक्षन्ति
	or	or	or
	तक्ष्णोति	तक्ष्णुतः	तक्ष्णुवन्ति
	तक्ष्णोषि	तक्ष्णुथः	तक्ष्णुथ

or

तक्षसि	तक्षथः	तक्षथ
तक्षामि or तक्ष्णोमि	{ तक्षावः or तक्ष्णुवः	{ तक्षामः or तक्ष्णुमः

Pot. विधिलिङ्—तक्षेत्-तक्ष्णुयात्. Imp. लोट्—तक्षतु-तक्ष्णोतु. तक्ष-तक्ष्णुहि. तक्षाणि-तक्ष्णवानि. Impf. लङ्—अतक्षत्-अतक्ष्णोत्. Perf. लिट्—ततक्ष, ततक्षतुः. ततष्ठ-ततक्षिथ, ततक्षथुः ; ततक्ष, ततक्ष्व-ततक्षिव. Aor. लुङ्—

अतक्षीत्	अतक्षिष्टाम्	अतक्षिषुः
	or	
अताक्षीत्	अताष्टाम्	अताक्षुः
अतक्षीः	अतक्षिष्टम्	अतक्षिष्ट
	or	
अताक्षीः	अताष्टम्	अताष्ट
अतक्षिषम्	अतक्षिष्व	अतक्षिष्म
	or	
अताक्षम्	अताक्ष्व	अताक्ष्म

Fu. लृट्—तक्षिष्यति-तक्ष्यति. Per Fu. लुट्—तक्षिता-तष्टा. Con. लृङ्—अतक्षिष्यत्-अतक्ष्यत्. Ben. आशिर्लिङ्—तक्ष्यात्. Pas. कर्मणि—तक्ष्यते. Aor. कर्म-लुङ्—अतक्षि. Cau. णिजन्त—तक्षयति. Aor. णिच्-लुङ्—अततक्षत्. Des. सनन्त—तितक्षिषति. Fre. यङन्त—तातक्ष्यते. PP. निष्ठा—तष्टः. IP. क्त्वा—तक्षित्वा-तष्ट्वा. Inf

तुमुन्—तच्चितुम्-तष्टुम्. तनूकरणार्थे (सूक्ष्मीकरणार्थे) लट् लिङ् लोट् लङ्क्षु पक्षे 'नु':—यथा-तक्ष्णोति-तक्षति इत्यादि. अन्यार्थे तु वाग्भिः संतक्षति, भर्त्सयति इत्यर्थः.

तड्—चुरा U. से. आघाते, to beat. Pre. लट्—ताडयति-ते. Pot. विधिलिङ्—ताडयेत्-त. Imp. लोट्—ताडयतु-ताम्. Impf. लङ्—अताडयत्-त. Perf. लिट्—ताडयां चकार-चक्रे-आस-बभूव. Aor. लुङ्—अतीतडत्-त. Fu. लृट्—ताडयिष्यति-ते. Per Fu. लुट्—ताडयिता. Con. लृङ्—अताडयिष्यत्-त. Ben. आशिषि लिङ्—ताड्यात्-ताडयिषीष्ट. Pas. कर्मणि—ताड्यते. Aor. कर्म-लुङ्—अताडि. Cau. णिजन्त—ताडयति-ते. Des. सनन्त—तिताडयिषति-ते. Fre. यङन्त—ताताड्यते. Kri. कृत्य—ताडयितव्यः. PP. निष्ठा—ताडितः. IP. क्त्वा—ताडयित्वा. Inf. तुमुन्—ताडयितुम्.

तन्—तना U. से. विस्तारे, to stretch, to spread. Pre. लट्—

तनोति / तनुते	तनुतः / तन्वाते	तन्वन्ति / तन्वते
तनोषि / तनुषे	तनुथः / तन्वाथे	तनुथ / तनुध्वे
तनोमि / तन्वे	तनुवः-तन्वः / तनुवहे-तन्वहे	तनुमः-तन्मः / तनुमहे-तन्महे

Pot. विधिलिङ्—तनुयात्-तन्वीत. तनुयाताम्-तन्वीयाताम्. तनुयाः-तन्वीथाः. तनुयाम्-तन्वीय. Imp. लोट्—तनोतु-तनुताम्. तनुताम्-तन्वाताम्. तनु-तनुष्व. तनवानि-तनवै. Impf. लङ्—अतनोत्-अतनुत, अतनुताम्-अतन्वाताम्, अतन्वन्-अतन्वत. अतनोः-अतनुथाः, अतनुतम्-अतन्वाथाम्. अतनवम्-अतन्वि, अतनुव-अतन्व-अतनुवहि-अतन्वहि.

Perf. लिट्—	{ ततान तेने	तेनतुः तेनाते	तेनुः तेनिरे
	{ तेनिथ तेनिषे	तेनथुः तेनाथे	तेन तेनिध्वे
	{ ततान-ततन तेने	तेनिव तेनिवहे	तेनिम तेनिमहे
Aor. लुङ्—	{ अतानीत्- अतनीत्	{ अतानिष्टाम्- अतनिष्टाम् ro	{ अतानिषुः- अतनिषुः
	{ अतनिष्ट- अतत	अतनिषाताम्	अतनिषत
	{ अतानीः- अतनीः	{ अतानिष्टम्- अतनिष्टम् or	{ अतानिष्ट- अतनिष्ट
	{ अतनिष्ठाः- अतथाः	अतनिषाथाम्	अतनिध्वम्
	{ अतानिषम् अतनिषम्-	{ अतानिष्व- अतनिष्व or	{ अतानिष्म अतनिष्म
	अतनिषि	अतनिष्वहि	अतनिष्महि

Fu. ऌट्—तनिष्यति-तनिष्यते. Per Fu. लुट्—तनिता. Con. ऌङ्—अतनिष्यत्-त. Ben. आशिषि लिङ्—तन्यात्-तनिषीष्ट. Pas. कर्मणि—तायते-तन्यते, Aor. कर्म-लुङ्—अतानि. Cau. णिजन्त—तानयति-ते, Aor. णिच्-लुङ्—अतीतनत्-त. Des. सनन्त—

तितनिषति-ते, तितांसति-ते, तितंसति-ते. Fre. यङन्त—तन्तन्यते. PP. निष्ठा—ततः. IP. क्त्वा—तनित्वा-तत्वा. Inf. तुमुन्—तनितुम्.

सम् + तन् = सततम्-सन्ततम्.

वि + तन् + त्वा = वितत्य.

तप्—भ्वा P. अ. संतापे, to shine, to heat, to burn. Pre. लट्—तपति. Pot. विधिलिङ्—तपेत्. Imp. लोट्—तपतु. Impf. लङ्—अतपत्. Perf. लिट्—तताप, तेपतुः, तेपुः. तेपिथ-ततप्थ, तेपथुः, तेप. तताप-ततप, तेपिव, तेपिम. Aor. लुङ्—अताप्सीत्, अताप्ताम्. Fu. ऌट्—तप्स्यति. Per Fu. लुट्—तप्ता. Con. ऌङ्—अतप्स्यत्. Ben. आशिषि लिङ्—तप्यात्. Pas. कर्मणि—तप्यते. Aor. कर्म-लुङ्—अतापि. Caus. णिजन्त—तापयति. Aor. णिच्-लुङ्—अतीतपत्. Des. सनन्त—तितप्सति. Fre. यङन्त—तातप्यते. Kri. कृत्य—तपनीयः. PP. निष्ठा—तप्तः. IP. क्त्वा—तप्त्वा. Inf. तुमुन्—तप्तुम्.

उत् + तप् = उत्तपते. दीप्यते इत्यर्थः.

वि + तप् = वितपते (पाणिम्.)

अत्र अकर्मकत्वात्स्वाङ्गकर्मकत्वाच्चात्मनेपदम्.

उत्तपति सुवर्णम्. अत्र अस्वाङ्गकर्मकत्वान्नात्मनेपदम्. निस्+तप्—निष्टपति. पौनःपुन्यभिन्नार्थे षः. निष्टप्तम्.

तप्—दिवा A. अ. to be powerful. अस्य ऐश्वर्यार्थे वा आत्मनेपदं श्यन् च. Pre. लट्—तप्यते. Perf. लिट्—तेपे. तेपिषे. Aor. लुङ्—अतप्त, अतप्सातां. Fu. लृट्—तप्स्यते. Per Fu. लुट्—तप्ता. Ben. आशिषि लिङ्—तप्सीष्ट. Pas. कर्मणि—तप्यते. Caus. णिजन्त—तापयति, Aor. णिच्-लुङ्—अतीतपत्. Des. सनन्त—तितप्सते. Fre. यङन्त—तातप्यते. PP. निष्ठा—तप्तः. IP. क्त्वा—तप्त्वा. Inf. तुमुन्—तप्तुम्.

तप्—चुरा U. अ. दाहे, to heat. Pre. लट्—तापयति-ते. Perf. लिट्—तापयां चकार-चक्रे. Aor. लुङ्—अतीतपत्-त. Fu. लृट्—तप्स्यति-ते. Per Fu. लुट्—तप्ता.

तर्क्—चुरा U. से. वितर्कार्थे, to reason. Pre. लट्—तर्कयति-ते. Perf. लिट्—तर्कयांचकार-चक्रे. Aor. लुङ्—अततर्कत्-त. Fu. लृट्—तर्कयिष्यति-ते. Per Fu. लुट्—तर्कयिता. PP. निष्ठा—तर्कितः. IP. क्त्वा—तर्कयित्वा. Inf. तुमुन्—तर्कयितुम्.

तर्ज्—भ्वा P. से. भर्त्सने, to threaten, to censure, चुरा A. to blame. Pre. लट्—तर्जति-तर्जयते. Perf. लिट्—ततर्ज-तर्जयां चक्रे. Aor. लुङ्—अतर्जीत्-अततर्जत. Fu. लृट्—तर्जिष्यति-तर्जयिष्यते. Per Fu. लुट्—तर्जिता-तर्जयिता. Pas. कर्मणि—तर्ज्यते. PP. निष्ठा—तर्जितः. Inf. तुमुन्—तर्जितुम्-तर्जयितुम्.

तिज्—भ्वा A. से, निशाने, to be sharp. The Desiderative of this root means 'to endure, to forbear'. क्षमार्थे नित्यसनन्तोऽयम्. Pre. लट्—तितिक्षते. तितिक्षसे. तितिक्षे. Pot. विधिलिङ्—तितिक्षेत. Imp. लोट्—तितिक्षताम्. Impf. लङ्—अतितिक्षत. Perf. लिट्—तितिक्षां-चक्रे. Aor. लुङ्—अतितिक्षिष्ट. Fu. लृट्—तितिक्षिष्यते. Per. Fu. लुट्—तितिक्षिता. Con. लृङ्—अतितिक्षिष्यत. Ben. आशिषि लिङ्—तितिक्षिषीष्ट. Pas. कर्मणि—तितिक्ष्यते. Cau. णिजन्त—तितिक्षयति. Kri. कृत्य—तितिक्षितव्यः. PP. निष्ठा—तितिक्षितः. Inf. तुमुन्—तितिक्षितुम्.

तिज्—चुरा P. से, निशाने, to sharpen. Pre. लट्—तेजयति, Pot. विधिलिङ्—तेजयेत्. Imp. लोट्—तेजयतु. Impf. लङ्—अतेजयत्. Perf. लिट्—तेजयांचकार. Aor. लुङ्—अतीतिजत्. Fu. लृट्—तेजयिष्यति. Per Fu. लुट्—तेजयिता. Inf. तुमुन्—तेजयितुम्.

कुसुमचापमतेजयदंशुभिर्हिमकरः ।
ज्ञातीनुत्तेजयामि सुहृदः परिमोक्षणाय ॥

तुद्—तुदा U. अ. व्यथने to strike, to wound.

Pre. लट्—	तुदति-ते.	तुदसि-से.	तुदामि-तुदे.
Pot. विधिलिङ्-	तुदेत्-त.	तुदेः-थाः.	तुदेयम्-तुदेय.
Imp. लोट्—	तुदतु-ताम्.	तुद-स्व.	तुदानि-तुदै.
Impf. लङ्—	अतुदत्-त.	अतुदः-थाः	अतुदम्-अतुदे

Perf. लिट्—तुतोद-तुतुदे. Aor. लुङ्—अतौत्सीत्-अतुत्त. Fu. लृट्—तोत्स्यति-ते. Per Fu. लुट्—तोत्ता. Con. लृङ्—अतोत्स्यत्-त. Ben. आशिषि लिङ्—तुद्यात् तोत्सीष्ट. Pas. कर्मणि—तुद्यते. Aor. कर्म-लुङ्—अतोदि. Cau. णिजन्त—तोदयति-ते. Aor. णिच्-लुङ्—अतूतुदत्-त. Des. सनन्त—तुतुत्सति-ते. Fre. यङन्त—तोतुद्यते. PP. निष्ठा—तुन्नः. IP. क्त्वा—तुत्त्वा. तुदसि मर्माणि वाक्शरैः वहन्तं किं तुदसि भोः.

तुल्—चुरा U. से, उन्माने, to raise, to weigh. Pre. लट्—तोलयति-ते. Pot. विधिलिङ्—तोलयेत्-त. Imp. लोट्—तोलयतु-ताम्. Impf. लङ्—अतोलयत्-त. Perf. लिट्—तोलयां चकार चक्रे-आस-बभूव. Aor. लुङ्—अतूतुलत्-त. Fu. लृट्—तोलयिष्यति-ते. Per Fu. लुट्—तोलयिता. Con. लृङ्—अतोलयिष्यत्-त. Ben. आशिषि लिङ्—तोल्यात्-तोलयिषीष्ट. Pas. कर्मणि—तोल्यते. Aor. कर्म-लुङ्—अतोलि. Cau. णिजन्त—तोलयति-ते. Des. सनन्त—तुतोलयिषति. PP. निष्ठा—तोलितः. IP. क्त्वा—तोलयित्वा, Inf. तुमुन्—तोलयितुम्.

धनुस्तोलयिष्यामि पाणिना.

तुष्—दिवा P. अ. तुष्टौ, to be pleased or satisfied. Pre. लट्—तुष्यति. Pot. विधिलिङ्—तुष्येत्. Imp. लोट्—तुष्यतु. Impf. लङ्—अतुष्यत्. Perf. लिट्—तुतोष. Aor. लुङ्—अतुषत्. Fu. लृट्—तोक्ष्यति. Per Fu. लुट्—तोष्टा. Con. लृङ्—अतोक्ष्यत्. Ben.

आशिषि लिङ्—तुष्यात्. Pas. कर्मणि—तुष्यते. Aor. कर्म-लुङ्—अतोषि. Cau. णिजन्त—तोषयति-ते. Aor. णिच्-लुङ्—अतूतुषत्. Des. सनन्त—तुतुक्षति. PP. निष्ठा.—तुष्टः. Inf. तुमुन्—तोष्टुम्.

तृप्—दिवा P. से. प्रीणने, इह प्रीणनं तृप्तिस्तर्पणं च to become satisfied, to delight. Pre. लट्—तृप्यति. Pot. विधिलिङ्—तृप्येत्. Imp. लोट्—तृप्यतु. Impf. लङ्—अतृप्यत्. Perf. लिट्—ततर्प, ततृपतुः, ततृपुः. ततर्पिथ-ततार्थ-तत्रप्थ, ततृपथुः, ततृप ; ततर्प, ततृपिव, ततृपिम. Aor. लुङ्—अतृपत्-अतर्पीत्-अत्राप्सीत्-अताप्सीत्. Fu. लृट्—तर्पिष्यति-त्रप्स्यति-तर्प्स्यति Per Fu. लुट्—तर्पिता-तर्प्ता-त्रप्ता. Con. लृङ्—अतर्पिष्यत्-अतर्प्स्यत्-अत्रप्स्यत्. Ben. आशिषि लिङ्—तृप्यात्. Pas. कर्मणि—तृप्यते, Aor. कर्म-लुङ्—अतर्पि. Cau. णिजन्त—तर्पयति, Aor. णिच्-लुङ्—अततर्पत्-अतीतृपत्. Des. सनन्त—तितर्पिषति-तितृप्सति. Fre. यङन्त—तरीतृप्यते. PP. निष्ठा—तृप्तः. IP. क्त्वा—तर्पित्वा-तृप्त्वा. Inf. तुमुन्—तर्पितुम्-त्रप्तुम्-तर्प्तुम्. नाग्निस्तृप्यति काष्ठानाम्.
पितॄन् अताप्सीत्.

तृष्— (ञि तृष्)—दिवा P. से. पिपासायाम्, to be thirsty. Pre. लट्—तृष्यति. Per Fu. लुट्—तर्षिता. PP. निष्ठा – तृषितः. IP. क्त्वा—तृषित्वा-तर्षित्वा.

तॄ—भ्वा P. से. प्लवनतरणयोः, to swim, to cross. Pre. लट्—तरति. Pot. विधिलिङ्—तरेत्. Imp. लोट्—

तरतु. Impf. लङ्—अतरत्. Perf. लिट्—ततार, तेरतुः, तेरुः. तेरिथ, तेरथुः, तेर. ततार-ततर, तेरिव, तेरिम. Aor. लुङ्—अतारीत्, अतारिष्टाम्, अतारिषुः. अतारीः, अतारिष्टम्, अतारिष्ट. अतारिषम्, अतारिष्व, अतारिष्म. Fu. लृट्—तरिष्यति-तरीष्यति. Per Fu. लुट्—तरीता-तरिता. Con. लृङ्—अतरिष्यत्-अतरीष्यत्. Ben. आशिषि लिङ्—तीर्यात्. Pas. कर्म्मणि—तीर्यते, Aor कर्म-लुङ्—अतारि. Cau. णिजन्त—तारयति, Aor. णिच्-लुङ्—अतीतरत्. Des. सनन्त—तितीर्षति-तितरिषति-तितरीषति. Fre. यङन्त—तेतीर्यते. Kri. कृत्य—तीर्यः. PP. निष्ठा—तीर्णः. IP.—क्त्वा तीर्त्वा. Inf. तुमुन्—तरितुम्-तरीतुम्-तर्त्तुम्. If used in the Atmanapada, it forms—

वि+अति=Pre. लट्—व्यतितरते. Pot. विधिलिङ्-व्यतितरेत. Imp. लोट्—व्यतितरताम्. Impf. लङ्—व्यत्यतरत. Perf. लिट्—व्यतितेरे. Aor. लुङ्—व्यत्यतीर्ष्ट-व्यत्यतरिष्ट-व्यत्यतरीष्ट. Fu. लृट्—व्यतितरिष्यते-व्यतितरीष्यते. Per Fu. लुट्—व्यतितरीता-तरिता. Ben. आशिषिलिङ्—व्यतितरिषीष्ट-तरीषीष्ट-तीर्षीष्ट.

त्यज्—भ्वा P. अ. हानौ, to abandon. Pre. लट्—त्यजति. Pot. विधिलिङ्—त्यजेत्. Imp. लोट्—त्यजतु. Impf. लङ्—अत्यजत्. Perf. लिट्—तत्याज, तत्यजतुः, तत्यजुः. तत्यजिथ-तत्यक्थ, तत्यजथुः, तत्यज. तत्याज-तत्यज, तत्यजिव, तत्यजिम Aor. लुङ्—अत्याक्षीत्.

अत्याक्षीः, अत्याक्षम्. Fu. लृट्—त्यक्ष्यति. Per Fu. लुट्—त्यक्ता. Con. लृङ्—अत्यक्ष्यत्. Ben. आशिषि लिङ्—त्यज्यात्. Pas. कर्मणि—त्यज्यते, Aor. कर्म-लुङ्—अत्याजि. Cau. णिजन्त—त्याजयति, Aor. णिच्-लुङ्—अतित्यजत्. Des. सनन्त—तित्यक्षति. Fre. यङन्त—तात्यज्यते. PP. निष्ठा—त्यक्तः. IP. क्त्वा—त्यक्त्वा. Inf. तुमुन्—त्यक्तुम्.

त्रुट्—तुदा P. से, छेदने. to cut. Pre. लट्—त्रुटति-त्रुट्यति. Pot. विधिलिङ्—त्रुटेत्-त्रुट्येत्. Imp. लोट्—त्रुटतु-त्रुट्यतु. Impf. लङ्—अत्रुटत्-अत्रुट्यत्. Perf. लिट्—तुत्रोट. Aor. लुङ्—अत्रुटीत्. Fu. लृट्—त्रुटिष्यति. Per Fu. लुट्—त्रुटिता. Con. लृङ्—अत्रुटिष्यत्. Ben. आशिषि लिङ्—त्रुट्यात्. Pas. कर्मणि—त्रुट्यते, Aor. कर्मलुङ्—अत्रोटि. Cau. णिजन्त—त्रोटयति, Aor. णिच्-लुङ्—अतुत्रुटत्. Des. सनन्त—तुत्रुटिषति. PP. निष्ठा—त्रुटितः. IP. क्त्वा—त्रुटित्वा. Inf. तुमुन्—त्रुटितुम्.

त्रुट्—चुरा A. से. छेदने, to cut. Pre—लट्—त्रोटयते.

त्रै—भ्वा A. अ. पालने, to protect. Pre. लट्—त्रायते. Pot. विधिलिङ्—त्रायेत. Imp. लोट्—त्रायताम्. Impf. लङ्—अत्रायत. Perf. लिट्—तत्रे. तत्रिषे. तत्रे. Aor. लुङ्—अत्रास्त. Fu. लृट्—त्रास्यते. Per Fu. लुट्—त्राता. Con. लृङ्—अत्रास्यत. Ben. आशिषि लिङ्—त्रासीष्ट. Pas. कर्मणि—त्रायते, Aor. कर्म-लुङ्—अत्रायि.

S9-0204

Cau. णिजन्त—त्रापयति, Aor. णिच्-लुङ्—अतित्रपत्. Des. सनन्त—तित्रासते. Fre. यङन्त—तात्रायते. Kri. कृत्य—त्रातव्यः. PP. निष्ठा—त्राणः-त्रातः. Inf. तुमुन्—त्रातुम्.

त्वर्—(ञि त्वरा)—भ्वा A. से. सम्भ्रमे, to hurry. Pre. लट्—त्वरते. Pot. विधिलिङ्—त्वरेत. Imp. लोट् त्वरताम्. Impf. लङ्—अत्वरत. Perf. लिट्—तत्वरे. Aor. लुङ्—अत्वरिष्ट. Fu. लृट्—त्वरिष्यते. Per. Fu. लुट्—त्वरिता. Con. लृङ्—अत्वरिष्यत. Ben. आशिर्लिङ्—त्वरिषीष्ट. Pas. कर्मणि—त्वर्यते, Aor. कर्म-लुङ् अत्वरि-अत्वारि. Cau. णिजन्त—त्वरयति, Aor. णिच् लुङ्—अतत्वरत्. Des. सनन्त- तित्वरिषते. Fre. यङन्त—तात्वर्यते. PP. निष्ठा—तूर्णः-त्वरितः. Inf. तुमुन्—त्वरितुम्.

द

दद्—भ्वा A. से. दाने, to give. Pre. लट्—ददते. ददसे. ददे. Pot. विधिलिङ्—ददेत. Imp. लोट्—ददताम्. Impf. लङ्—अददत. Perf. लिट्—ददे. ददिषे. ददे. Aor. लुङ्—अददिष्ट. Fu. लृट्—ददिष्यते. Per Fu. लुट्—ददिता. Con. लृङ्—अददिष्यत. Ben.

आशिषि लिङ्—ददिषीष्ट. Pas. कर्मणि—दद्यते, Aor. कर्म-लुङ्—अदादि. Cau. णिजन्त—दादयते, Aor. णिच्-लुङ्—अदीददत. Des. सनन्त—दिददिषते. Fre. यङन्त—दादद्यते. PP. निष्ठा—ददितः. Inf. तुमुन्—ददितुम्.

दध्—भ्वा A. से. धारणे, to hold. Pre. लट्—दधते. Perf. लिट्—देधे. Aor. लुङ्—अदधिष्ट. Per Fu. लुट्—दधिता. Ben. आशिषि लिङ्—दधिषीष्ट. Pas. कर्मणि—दध्यते, Aor कर्म-लुङ्—अदाधि. Cau. णिजन्त—दाधयते. Des. सनन्त—दिदधिषते. Inf. तुमुन्—दधितुम्.

दंश्—भ्वा P. अ. दंशने, (दंशनं दंष्ट्रा) to bite. Pre. लट्—दशति. Pot. विधिलिङ्—दशेत्. Imp. लोट्—दशतु. Impf. लङ्—अदशत्. Perf. लिट्—ददंश, ददशतुः-ददंशतुः. ददंशिथ-ददंष्ठ, ददशथुः-ददंशथुः. ददंश, ददशिव-ददंशिव. Aor. लुङ्—अदांक्षीत्. अदांक्षीः. अदांक्षम्. Fu. लृट्—दंक्ष्यति. Per Fu. लुट्—दंष्टा. Con लृङ्—अदंक्ष्यत्. Ben. आशिषि लिङ्—दश्यात्. Pas. कर्मणि—दश्यते. Aor. कर्म-लुङ्—अदंशि. Cau. णिजन्त—दंशयति. Aor. णिच्-लुङ्—अददंशत्. Des. सनन्त—दिदङ्क्षति. Fre. यङन्त—दन्दश्यते. PP. निष्ठा—दष्टः. IP. क्त्वा—दष्ट्वा. Inf. तुमुन्—दंष्टुम्.

दंश्—(दशि) चुरा A. अ. दंशने, to bite. Pre. लट्—दंशयते-दंशति. Ben. आशिषि लिङ्—दंशयिषीष्ट-दंश्यात्. Pas. कर्मणि—दंश्यते. PP. निष्ठा—दंष्टः. IP. क्त्वा—दंष्ट्वा. Inf. तुमुन्—दंष्टुम्.

दम्—दिवा P. से. उपशमने, to tame, to be tamed, to conquer. Pre. लट्—दाम्यति. Pot. विधि-लिङ्—दाम्येत्. Imp. लोट्—दाम्यतु. Impf.—लङ्—अदाम्यत्. Perf. लिट्—ददाम, देमतुः. देमिथ, देमथुः. ददाम, देमिव. Aor. लुङ्—अदमत्. Fu. लृट्—दमिष्यति. Per Fu. लुट्—दमिता. Con. लृङ्—अदमिष्यत्. Ben. आशिषि लिङ्—दम्यात्. Pas. कर्मणि—दम्यते, Aor. कर्म-लुङ्—अदमि-अदामि. Cau. णिजन्त—दमयति, Aor. णिच्-लुङ्—अदीदमत्. Des. सनन्त—दिदमिषति. Fre. यङन्त—दंदम्यते. PP. निष्ठा—दान्तः-दमितः. IP. क्त्वा-दान्त्वा-दमित्वा. Inf. तुमुन्—दमितुम्.

दरिद्रा—अदा P. से. दुर्गतौ, to be poor. Pre. लट्—दरिद्राति, दरिद्रितः, दरिद्रति. दरिद्रासि, दरिद्रिथः, दरिद्रिथ. दरिद्रामि, दरिद्रिवः, दरिद्रिमः. Pot. विधिलिङ्—दरिद्रियात्, दरिद्रियाताम्, दरिद्रियुः. दरिद्रियाः, दरिद्रियातम्, दरिद्रियात. दरिद्रियाम्, दरिद्रियाव, दरिद्रियाम. Imp. लोट्—दरिद्रातु, दरिद्रिताम्, दरिद्रतु. दरिद्रिहि, दरिद्रितम्, दरिद्रित. दरिद्राणि, दरिद्राव, दरिद्राम. Impf. लङ्—अदरिद्रात्, अदरिद्रिताम्, अदरिद्रुः. अदरिद्राः. अदरिद्राम्. Perf. लिट्—ददरिद्रौ-दरिद्रांचकार. Aor. लुङ्—अदरिद्रीत्-अदरिद्रासीत्. अदरिद्रीः-अदरिद्रासीः, अदरिद्रिषम्-अदरिद्रासिषम्. Fu. लृट्—दरिद्रिष्यति. Per Fu. लुट्—दरिद्रिता. Con. लृङ्—अदरिद्रिष्यत्. Ben. आशिषि लिङ्—दरिद्र्यात्. Pas. कर्मणि—दरिद्र्यते, Aor. कर्म-लुङ्—अदरिद्रि-अदरिद्रायि. Cau. णिजन्त—दरिद्रयति, Aor.

णिच्-लुङ्—अदिदरिद्रत्. Des. सनन्त—दिदरिद्रासति-दिदरिद्रिषति. (न दरिद्रायके लोपो दरिद्राणे च नेष्यते। दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥). PP. निष्ठा—दरिद्रितः. Inf. तुमुन्—दरिद्रितुम्.

दह्—भ्वा P. अ. भस्मीकरणे, to burn, to pain. Pre. लट्—दहति. Pot. विधिलिङ्—दहेत्. Imp. लोट्—दहतु. Impf. लङ्—अदहत्. Perf. लिट्—ददाह, देहतुः. देहिथ-ददग्ध, देहथुः. ददाह, देहिव. Aor. लुङ्—अधाक्षीत्, अदाग्धाम्, अधाक्षुः. अधाक्षीः, अदाग्धम्, अदाग्ध. अधाक्षम्, अधाक्ष्व, अधाक्ष्म. Fu. लृट्—धक्ष्यति. Per Fu. लुट्—दग्धा. Con. लृङ्—अधक्ष्यत्. Pas. कर्मणि—दह्यते. Aor. कर्म-लुङ्—अदाहि. Cau. णिजन्त—दाहयति. Aor. णिच्-लुङ्—अदीदहत्. Des. सनन्त—दिधक्षति. Fre. यङन्त—दंदह्यते. PP. निष्ठा—दग्धः. IP. क्त्वा—दग्ध्वा. Inf. तुमुन्—दग्धुम्.

दा (दाण्)—भ्वा P. अ. दाने, to give. Pre. लट्—यच्छति. यच्छसि. यच्छामि. Pot. विधिलिङ्—यच्छेत्. यच्छेः. यच्छेयम्. Imp. लोट्—यच्छतु, यच्छ: यच्छानि. Impf. लङ्—अयच्छत्. अयच्छः, अयच्छम्. Perf. लिट्—ददौ, ददतुः. ददिथ-ददाथ, ददथुः. ददौ, ददिव. Aor. लुङ्—अदात्, अदाताम्, अदुः. अदाः, अदातम्, अदात. अदाम्, अदाव, अदाम. Fu. लृट्—दास्यति. दास्यसि. दास्यामि. Per Fu. लुट्—दाता. दातासि. दातास्मि. Con. लृङ्—अदास्यत्. Ben. आशिषि लिङ्—देयात्. देयाः. देयासम्. Pas. कर्मणि—दीयते, Aor. कर्म-लुङ्—अदायि. Cau.

णिजन्त—दापयति, Aor. णिच्-लुङ्—अदीदपत्. Des. सनन्त—दित्सति. Fre. यङन्त—देदीयते. Kri. कृत्य—दातव्यः, दानीयः, देयः. PP. निष्ठा—दत्तः. IP. क्त्वा—दत्त्वा. Inf. तुमुन्—दातुम्.

दा (डुदाञ्)—जुहो॰ U. दाने to give.

PARASMAIPADA.

Pre. लट्-ददाति	दत्तः	ददति
ददासि	दत्थः	दत्थ
ददामि	दद्वः	दद्मः

ATMANEPADA.

दत्ते	ददाते	ददते
दत्से	ददाथे	दद्ध्वे
ददे	दद्वहे	दद्महे

PARASMAIPADA.

Pot. विधिलिङ्-दद्यात्	दद्याताम्	दद्युः
दद्याः	दद्यातम्	दद्यात
दद्याम्	दद्याव	दद्याम

ATMANEPADA.

ददीत	ददीयाताम्	ददीरन्
ददीथाः	ददीयाथाम्	ददीध्वम्
ददीय	ददीवहि	ददीमहि.

PARASMAIPADA.

Imp. लोट्—ददातु	दत्ताम्	ददतु
देहि	दत्तम्	दत्त
ददानि	ददाव	ददाम.

ATMANEPADA.

दत्ताम्	ददाताम्	ददताम्
दत्स्व	ददाथाम्	दद्ध्वम्
ददै	ददावहै	ददामहै.

PARASMAIPADA.

Impf. लङ्—अददात्	अदत्ताम्	अददुः
अददाः	अदत्तम्	अदत्त
अददाम्	अदद्व	अदद्म

ATMANEPADA.

अदत्त	अददाताम्	अददत
अदत्थाः	अददाथाम्	अदद्ध्वम्
अददि	अदद्वहि	अदद्महि.

Perf. लिट्—ददौ-ददे. ददतुः-ददाते. ददाथ-ददिथ-ददिषे, ददथुः-ददाथे ; ददौ-ददे, ददिव-ददिवहे. Aor. लुङ्—अदात्-अदित, अदाताम्-अदिषाताम्, अदुः-अदिषत. अदाः-अदिथाः. अदाम्-अदिषि. Fu. लृट्—दास्यति-दास्यते. Per Fu. लुट्—दाता. Con. लृङ्—अदास्यत्-अदास्यत. Ben. आशिषि लिङ्—देयात्-दासीष्ट. Pas. कर्मणि—दीयते, Aor. कर्म-लुङ्—अदायि. Cau.

णिजन्त—दापयति, Aor. णिच्-लुङ्—अदीदपत्. Des. सनन्त—दित्सति-ते. Fre. यङन्त—देदीयते. PP. निष्ठा—दत्तः. IP. क्त्वा—दत्त्वा, प्रदाय. Inf. तुमुन्—दातुम्. After आ+दा=विद्याम् आदत्ते, व्याददते पिपीलिकाः पतंगस्य मुखम्; but—स्वाङ्गविकसनार्थे न, यथा—स्वमुखं व्याददाति.

दान्—भ्वा U. to straighten (आर्जवे नित्य-सनन्तोऽयम्). Pre. लट्—दीदांसति-दीदांसते. Pot. विधि-लिङ्—दीदांसेत्-त. Imp. लोट्—दीदांसतु-ताम्, Impf. लङ्—अदीदांसत्-त. Perf. लिट्—दीदांसांचकार-चक्रे. Aor. लुङ्—अदीदांसीत्-सिष्ट. Fu. लृट्—दीदांसिष्यति-ते. Inf. तुमुन्—दीदांसितुम्.

दिव्—दिवा P. से. क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु, to play, to desire to overcome, to sell, to shine, to praise, to delight, to be mad, to be sleepy, to love, to go etc. Pre. लट्—दीव्यति. दीव्यसि. दीव्यामि. Pot. विधिलिङ्—दीव्येत्. दीव्येयम्. Imp. लोट्—दीव्यतु. दीव्य. दीव्यानि. Impf. लङ्—अदीव्यत्. अदीव्यः. अदीव्यम्. Perf. लिट्—दिदेव, दिदिवतुः. दिदेविथ, दिदिवथुः. दिदेव, दिदिविव. Aor. लुङ्—अदेवीत्. अदेवीः. अदेविषम्. Fu. लृट्—देविष्यति. Per Fu. लुट्—देविता. Con. लृङ्—अदेविष्यत्. Ben. आशिषि लिङ्—दीव्यात्. Pas. भावे (क्रीडार्थे)—दीव्यते. Aor. लुङ्—अदेवि. Cau. णिजन्त—देवयति. Aor. णिच्-लुङ्—अदीदिवत्. Des. सनन्त—दिदेविषति-दुद्यूषति.

Fre. यङन्त—देदीव्यते. PP. निष्ठा—द्यूनः (अविजिगीषायाम्), द्यूतः (विजिगीषायाम्). IP. क्त्वा—देवित्वा-द्यूत्वा. Inf. तुमुन्—देवितुम्. अक्षैः अक्षान् वा दीव्यति. शतस्य दीव्यति. शतस्य शतं वा प्रतिदीव्यति.

दिव्—चुरा U. से. परिकूजने, to lament. Pre. लट्—देवयति-ते. Perf. लिट्—देवयां चकार-चक्रे. Inf. तुमुन्—देवयितुम्.

दिश्—तुदा U. अ. अतिसर्जने, to produce, to grant, to allow. Pre. लट्—दिशति-दिशते. Pot. विधिलिङ्-दिशेत्-दिशेत. Imp.—लोट्—दिशतु, दिशताम्. Impf. लङ्—अदिशत्-अदिशत. Perf. लिट्—दिदेश-दिदिशे, दिदिशुः-दिदिशिरे. दिदेशिथ-दिदिशिषे. दिदेश-दिदिशे. Aor. लुङ्—अदिक्षत्-अदिक्षत, अदिक्षताम्-अदिक्षाताम्. अदिक्षः-अदिक्षथाः. अदिक्षम्-अदिक्षि, अदिक्षाव-अदिक्षावहि. Fu. लृट्—देक्ष्यति-देक्ष्यते. Per Fu. लुट्—देष्टा. Con. लृङ्—अदेक्ष्यत्-त. Ben. आशिषि लिङ्—दिश्यात्-दिक्षीष्ट. Pas. कर्मणि—दिश्यते, Aor. कर्म-लुङ्—अदेशि. Cau. णिजन्त—देशयति-ते, Aor. णिच्-लुङ्—अदीदिशत्-त. Des. सनन्त—दिदिक्षति-दिदिक्षते. Fre. यङन्त—देदिश्यते. PP. निष्ठा—दिष्टः. IP. क्त्वा—दिष्ट्वा. Inf. तुमुन्—देष्टुम्.

दीक्ष्—भ्वा A.से. मौण्ड्य-इज्या-उपनयन-नियम-व्रत-आदेशेषु, to shave, to sacrifice, to invest with a sacred thread, to dedicate oneself to, to teach. Pre. लट्—दीक्षते. Perf. लिट्—दिदीक्षे. Aor. लुङ्—

अदीक्षिष्ट. Fu. लृट्—दीक्षिष्यते. Per Fu. लुट्—दीक्षिता. Con. लृङ्—अदीक्षिष्यत. Ben. आशिषि लिङ्—दीक्षिषीष्ट. Pas. कर्मणि—दीक्ष्यते, Aor. कर्म-लुङ्—अदीक्षि. Cau. णिजन्त—दीक्षयति-ते, Aor. णिच्-लुङ्—अदिदीक्षत्-त. Des. सनन्त—दिदीक्षिषते. PP. निष्ठा—दीक्षितः. IP. क्त्वा—दीक्षित्वा. Inf. तुमुन्—दीक्षितुम्.

दीप्—दिवा A. से. दीप्तौ, to shine, to burn. Pre. लट्—दीप्यते. Pot. विधिलिङ्—दीप्येत. Imp. लोट्—दीप्यताम्. Impf. लङ्—अदीप्यत. Perf. लिट्—दिदीपे. Aor. लुङ्—अदीपि-अदीपिष्ट. Fu. लृट्—दीपिष्यते. Per Fu. लुट्—दीपिता. Con. लृङ्—अदीपिष्यत. Ben. आशिषि लिङ्—दीपिषीष्ट. Pas. भावे—दीप्यते, Aor. भावे-लुङ्—अदीपि. Cau. णिजन्त—दीपयति-ते, Aor. णिच्-लुङ्—अदीदिपत्-अदिदीपत्. Des. सनन्त—दिदीपिषते. Fre. यङन्त—देदीप्यते. PP. निष्ठा—दीप्तः. Inf. तुमुन्—दीपितुम्.

दुष्—दिवा P. अ. वैकृत्ये (वैकृत्यं विकृतिः), to wrong, to be impure, Pre. लट् दुष्यति. Pot. विधिलिङ्—दुष्येत्. Imp. लोट्—दुष्यतु. Impf. लङ्—अदुष्यत्. Perf. लिट्—दुदोष. Aor. लुङ्—अदुषत्, अदुषताम्, अदुषन्. अदुषः. अदुषम्. Fu. लृट्—दोक्ष्यति. Per Fu. लुट्—दोष्टा. Con. लृङ्--अदोक्ष्यत्. Ben. आशिषि लिङ्—दुष्यात्. Pas. कर्मणि—दुष्यते, Aor. कर्म-लुङ्—अदोषि. Cau. णिजन्त—दूषयति-दोषयति, Aor. णिच्-

लुङ्—अदूदुषत्. Des. सनन्त—दुदुक्षति. Fre. यङन्त—दोदुष्यते. Kri. कृत्य—दोषणीयः. PP. निष्ठा—दुष्टः. Inf. तुमुन्—दोष्टुम्.

क्रोधः चित्तं दूषयति दोषयति वा.

दुह्—अदा U. अ. प्रपूरणे, दोहने, to fill up, to milk, to make a profit.

Pre. लट्—

PARASMAIPADA.

दोग्धि	दुग्धः	दुहन्ति
धोक्षि	दुग्धः	दुग्ध
दोह्मि	दुह्वः	दुह्मः

ATMANEPADA.

दुग्धे	दुहाते	दुहते
धुक्षे	दुहाथे	धुग्ध्वे
दुहे	दुह्वहे	दुह्महे

PARASMAIPADA

Pot. विधिलिङ्—

दुह्यात्	दुह्याताम्	दुह्युः
दुह्याः	दुह्यातम्	दुह्यात
दुह्याम्	दुह्याव	दुह्याम

ATMANEPADA.

दुहीत	दुहीयाताम्	दुहीरन्
दुहीथाः	दुहीयाथाम्	दुहीध्वम्
दुहीय	दुहीवहि	दुहीमहि

PARASMAIPADA.

Imp. लोट्—

दोग्धु	दुग्धाम्	दुहन्तु
दुग्धि	दुग्धम्	दुग्ध
दोहानि	दोहाव	दोहाम

ATMANEPADA.

दुग्धाम्	दुहाताम्	दुहताम्
धुक्ष्व	दुहाथाम्	धुग्ध्वम्
दोहै	दोहावहै	दोहामहै

PARASMAIPADA.

Impf. लङ्—

अधोक्-ग्	अदुग्धाम्	अदुहन्
अधोक्-ग्	अदुग्धम्	अदुग्ध
अदोहम्	अदुह्व	अदुह्म.

ATMANEPADA.

अदुग्ध	अदुहाताम्	अदुहत
अदुग्धाः	अदुहाथाम्	अधुग्ध्वम्
अदुहि	अदुह्वहि	अदुह्महि

PARASMAIPADA.

Perf. लिट्—

दुदोह	दुदुहतुः	दुदुहुः
दुदोहिथ	दुदुहथुः	दुदुह
दुदोह	दुदुहिव	दुदुहिम

ATMANEPADA.

दुदुहे	दुदुहाते	दुदुहिरे
दुदुहिषे	दुदुहाथे	दुदुहिध्वे
दुदुहे	दुदुहिवहे	दुदुहिमहे.

PARASMAIPADA.

Aor.—लुङ्—

अधुक्षत्	अधुक्षताम्	अधुक्षन्
अधुक्षः	अधुक्षतम्	अधुक्षत
अधुक्षम्	अधुक्षाव	अधुक्षाम

ATMANEPADA.

अदुग्ध अधुक्षत	अधुक्षाताम्	अधुक्षन्त
अदुग्धाः अधुक्षथाः	अधुक्षाथाम्	अधुग्ध्वम् अधुक्षध्वम्
अधुक्षि	अदुह्वहि अधुक्षावहि	अधुक्षामहि

Fu. लृट्—धोक्ष्यति-धोक्ष्यते. धोक्ष्यसि-धोक्ष्यसे. धोक्ष्यामि-धोक्ष्ये. Per Fu. लुट्—दोग्धा. Con. लृङ्—अधोक्ष्यत्-अधोक्ष्यत. Ben. आशिषि लिङ्—दुह्यात्-धुक्षीष्ट. Pas. कर्मणि—दुह्यते, Aor. कर्म-लुङ्—अदोहि. Cau. णिजन्त—दोहयति. Aor. णिच्-लुङ्—अदूदुहत्. Des. सनन्त—दुधुक्षति-दुधुक्षते. Fre. यङन्त—दोदुह्यते. Kṛi. कृत्य—दोग्धव्यः, दोहनीयः. PP. निष्ठा—दुग्धः. IP. क्त्वा—दुग्ध्वा. Inf. तुसुन्—दोग्धुम्.

अयं द्विकर्मकः. गां पयो दोग्धि. अप्रधानकर्मणि लादयः—दुह्यते गौः पयो देवदत्तेन. अदोहि गौः.

गौणे कर्मणि दुह्यादेः प्रधाने नी-हृ-कृष्-वहाम्,
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ;
प्रयोज्य-कर्मण्यन्येषां ण्यन्तानां लादयो मताः.

दृ—तुदा A, अ. आदरे, to honor, to regard, to care, to worship. It is chiefly used with the preposition आ. Pre. लट्—आद्रियते. आद्रियसे. आद्रिये. Pot. विधिलिङ्—आद्रियेत. Imp. लोट्—आद्रियताम्. Impf. लङ्—आद्रियत. Perf. लिट्—आदद्रे. आदद्रिषे. आदद्रे. Aor. लुङ्—आदृत, आदृषाताम्. आदृथाः. आदृषि. Fu. लृट्—आदरिष्यते. Per Fu. लुट्—आदर्ता. Con. लृङ्—आदरिष्यत. Ben. आशिषि लिङ्—आदृषीष्ट. Pas. कर्मणि—आद्रियते, Aor. कर्म-लुङ्—आदारि. Cau. णिजन्त—आदरयति-ते, Aor. णिच्-लुङ्—आदीदरत्-त Des. सनन्त—आदिदरिषते. Fre. यङन्त—आदेद्रीयते. Kṛi. कृत्य—आदर्तव्यः, आदरणीयः. PP. निष्ठा—आदृतः. IP. क्त्वा—दृत्वा, with आ = आदृत्य. Inf. तुमुन्—आदर्तुम्.

दृप्—दिवा P. अ. हर्षणमोहनयोः, to be glad, to be proud. Pre. लट्—दृप्यति. like तृप. PP. निष्ठा—दृप्तः.

दृश्—(दृशिर्)—भ्वा P. अ. प्रेक्षणे to see, to know, to visit. Pre. लट्—पश्यति. पश्यसि. पश्यामि.

Pot. विधिलिङ्—पश्येत्. पश्येः. पश्येयम्. Imp. लोट्—पश्यतु. पश्य. पश्यानि. Impf. लङ्—अपश्यत्. अपश्यः. अपश्यम्. Perf. लिट्—ददर्श, ददृशतुः, ददृशुः. ददर्शिथ-दद्रष्ठ, ददृशथुः. Aor. लुङ्—अद्राक्षीत्-अदर्शत्, अद्राष्टाम्-अदर्शताम्, अद्राक्षुः-अदर्शन्. अद्राक्षीः-अदर्शः, अद्राष्टम्-अदर्शतम्, अद्राष्ट-अदर्शत. अद्राक्षम्-अदर्शम्, अद्राक्ष्व-अदर्शाव, अद्राक्ष्म-अदर्शाम. Fu. ऌट्—द्रक्ष्यति. द्रक्ष्यसि. द्रक्ष्यामि. Per Fu. लुट्—द्रष्टा. द्रष्टासि. द्रष्टास्मि. Con. ऌङ्—अद्रक्ष्यत्, अद्रक्ष्यताम्, अद्रक्ष्यन्. अद्रक्ष्यः, अद्रक्ष्यतम्, अद्रक्ष्यत. अद्रक्ष्यम्, अद्रक्ष्याव, अद्रक्ष्याम. Ben. आशिषि लिङ्—दृश्यात्. दृश्याः. दृश्यासम्. Pas. कर्मणि—दृश्यते, Aor. कर्म-लुङ्—अदर्शि. Cau. णिजन्त—दर्शयति-ते, Aor. णिच्-लुङ्—अदीदृशत्-अददर्शत्. Des. सनन्त—दिदृक्षते. Fre. यङन्त—दरीदृश्यते. Kri. कृत्य—द्रष्टव्यः, दर्शनीयः, दृश्यः. PP. निष्ठा—दृष्टः. IP. क्त्वा—दृष्ट्वा, संदृश्य. Inf. तुमुन्—द्रष्टुम्.

पश्यन्ति भृत्या राजानम्, दर्शयते भृत्यान्-भृत्यै राजा.

दॄ—क्र्या P. से. विदारणे to tear, to divide. Pre. लट्—दृणाति. दृणासि. दृणामि. Pot. विधिलिङ्—दृणीयात्. दृणीयाः. दृणीयाम्. Imp. लोट्—दृणातु, दृणीताम्. दृणीहि. Impf. लङ्—अदृणात्, अदृणीताम्. अदृणाः, अदृणीतम्. अदृणाम्, अदृणीव. Perf. लिट्—ददार, दद्रतुः-ददरतुः. ददरिथ, दद्रथुः-ददरथुः. ददार, दद्रिव-ददरिव. Aor. लुङ्—अदारीत्. अदारीः. अदारिषम्. Fu. ऌट्—दरिष्यति-दरीष्यति. Per Fu. लुट्—दरिता-दरीता. Con. ऌङ्—अदरीष्यत्-अदरिष्यत्. Ben. आशिषि-लिङ्—दीर्यात्.

Pas. कर्मणि—दीर्यते, Aor. कर्म-लुङ्—अदारि. Cau. णिजन्त—दरयति (भयार्थे), दारयति, Aor. णिच्-लुङ्—अददरत्. Des. सनन्त—दिदरिषति-दिदरीषति-दिदीर्षति. Fre. यङन्त—देदीर्यते. PP. निष्ठा—दीर्णः (विदीर्णः). IP. क्त्वा—वि + दॄ = विदीर्य. व्यवदीर्णं मनो मम. जालं विदीर्य.

द्युत्—भ्वा A. से. दीप्तौ, tc shine. Pre. लट्—द्योतते. Pot. विधिलिङ्—द्योतेत. Imp. लोट्—द्योतताम्. Impf. लङ्—अद्योतत. Perf. लिट्—दिद्युते. Aor. लुङ्—अद्युतत्-अद्योतिष्ट (the Verb द्युत् optionally admits the लुङ् परस्मैपद). Fu. लृट्—द्योतिष्यते. Per Fu. लुट्—द्योतिता. Con. लृङ्—अद्योतिष्यत. Ben. आशिषि लिङ्—द्योतिषीष्ट. Pass. भावे—द्युत्यते, Aor. भावे-लुङ्—अद्योति. Cau. णिजन्त—द्योतयति, Aor. णिच्-लुङ्—अदिद्युतत्. Des. सनन्त—दिद्युतिषते-दिद्योतिषते. Fre. यङन्त—देद्युत्यते. PP. निष्ठा—द्युतितम्-द्योतितम्. IP. क्त्वा—द्युतित्वा-द्योतित्वा. Inf. तुमुन्—द्योतितुम्.

द्रु—भ्वा P. अ. गतौ, to melt, to rush, to run. Pre. लट्—द्रवति. Pot. विधिलिङ्—द्रवेत्. Imp. लोट्—द्रवतु. Impf. लङ्—अद्रवत्. Perf. लिट्—दुद्राव, दुद्रुवतुः. दुद्रोथ, दुद्रुवथुः. दुद्राव, दुद्रुव. Aor. लुङ्—अदुद्रुवत्. अदुद्रुवः. अदुद्रुवम्. Fu. लृट्—द्रोष्यति. Per Fu. लुट्—द्रोता. Con. लृङ्—अद्रोष्यत्. Ben. आशिषि लिङ्—द्रूयात्. Pas. भावे—द्रूयते, Aor. भावे-लुङ्—अद्रावि. Des. सनन्त—दुद्रूषति. Fre. यङन्त—दोद्रूयते. PP. निष्ठा—द्रुतः.

द्रुह्—दिवा P. वे. जिघांसायाम्, to bear malice or hatred. Pre. लट्--द्रुह्यति. Pot. विधिलिङ्--द्रुह्येत्, Imp. लोट्—द्रुह्यतु. Impf. लङ्—अद्रुह्यत्. Perf. लिट्—दुद्रोह, दुद्रुहतुः. दुद्रोहिथ-दुद्रोग्ध-दुद्रोढ, दुद्रुहथुः. दुद्रोह, दुद्रुहिव-दुद्रुह्व. Aor. लुङ्—अद्रुहत्. Fu. लृट्—द्रोहिष्यति-ध्रोक्ष्यति. Per Fu लुट्—द्रोहिता-द्रोग्धा-द्रोढा. Con. लृङ्—अद्रोहिष्यत्-अध्रोक्ष्यत्. Ben. आशिषि लिङ्—द्रुह्यात्. Pas. भावे-द्रुह्यते, Aor. भावे-लुङ्—अद्रोहि. Cau. णिजन्त—द्रोहयति, Aor. णिच्-लुङ्—अदुद्रुहत्. Des. सनन्त—दुद्रोहिषति-दुद्रुहिषति-दुध्रुक्षति. Fre. यङन्त—दोद्रुह्यते. PP. निष्ठा—द्रुग्धः-द्रूढः. IP. क्त्वा—द्रुहित्वा-द्रोहित्वा-द्रुग्ध्वा-द्रुढ्वा. Inf. तुमुन्—द्रोहितुम्-द्रोग्धुम्-द्रोढुम्. देवदत्ताय द्रुह्यति. उपसर्गपूर्वः द्रुहधातुः सकर्म्मकः. अभि+द्रु=देवदत्तम् अभिद्रुह्यति.

द्विष्—अदा U. अ. अप्रीतौ, to hate. Pre. लट्—द्वेष्टि-द्विष्टे, द्विष्टः-द्विषाते, द्विषन्ति-द्विषते. द्वेक्षि-द्विक्षे, द्विष्ठः-द्विषाथे, द्विष्ट-द्विड्ढ्वे. द्वेष्मि-द्विषे, द्विष्वः-द्विष्वहे; Pot. विधिलिङ्—द्विष्यात्-द्विषीत.-द्विष्याः द्विषीथाः. Imp. लोट्—द्वेष्टु-द्विष्टाम्, द्विष्टाम्-द्विषाताम्, द्विषन्तु-द्विषताम्. द्विड्ढि-द्विक्ष्व, द्विष्टम्-द्विषाथाम्, द्विष्ट-द्विढ्वम्. द्वेषाणि-द्वेषै, द्वेषाव-द्वेषावहै, द्वेषाम-द्वेषामहै.

Impf. लङ्—अद्वेट्-ड्-अद्विष्ट, अद्विष्टाम्-अद्विषाताम्, अद्विषुः-अद्विषन्-अद्विषत. अद्वेट्-ड्-अद्विष्ठाः, अद्विष्टम्-अद्विषाथाम्. अद्वेषम्-अद्विषि, अद्विष्व-अद्विष्वहि. Perf. लिट्—

दिद्वेष-दिद्विषे, दिद्विषतुः-दिद्विषाते. दिद्वेषिथ-दिद्विषिषे, दिद्विषथुः-दिद्विषाथे. दिद्वेष-दिद्विषे, दिद्विषिव-दिद्विषिवहे. Aor. लुङ्—अद्विक्षत्-अद्विक्षत, अद्विक्षताम्-अद्विक्षाताम्, अद्विक्षन्-अद्विक्षन्त. अद्विक्षः-अद्विक्षथाः, अद्विक्षतम्-अद्विक्षाथाम्. अद्विक्षम्-अद्विक्षे,अद्विक्षाव-अद्विक्षावहि. Fu. लृट्-द्वेक्ष्यति-द्वेक्ष्यते. Per Fu: लुट्—द्वेष्टा. Con. लृङ्—अद्वेक्ष्यत्-अद्वेक्ष्यत. Ben. आशिषि लिङ्—द्विष्यात्-द्विक्षीष्ट. Pas. कर्मणि—द्विष्यते, Aor. कर्म-लुङ्—अद्वेषि. Cau. णिजन्त—द्वेषयति, Aor. णिच्-लुङ्—अदिद्विषत्. Des. सनन्त—दिद्विक्षति-दिद्विक्षते. Fre. यङन्त—देद्विष्यते. PP. निष्ठा—द्विष्टः. IP क्त्वा—द्विष्ट्वा. Inf. तुमुन्—द्वेष्टुम्.

ध

धा—(डुधाञ्) जुहु U. अ. धारणपोषणयोः, to place, to grant, to maintain. This verb is conjugated like दा. It should be remembered, however, that the aspiration of the final ध्, if lost, must be thrown forward on the initial द्.

Pre. लट्—दधाति-धत्ते, धत्तः-दधाते दधति-दधते. दधासि-धत्से, धत्थः-दधाथे, धत्थ-धद्ध्वे. दधामि-दधे, दध्वः-

दध्वहे. Pot. विधिलिङ्—दध्यात्-दधीत. दध्याः-दधीथाः. दध्याम्-दधीय. Imp. लोट्—दधातु-धत्ताम्, धत्ताम्-दधाताम्. धेहि-धत्स्व, धत्त-धद्ध्वम्. दधानि-दधै. Impf. लङ्—अदधात्-अधत्त, अधत्ताम्-अदधाताम् अदधुः-अदधत. अदधाः-अधत्थाः, अधत्तम्-अदधाथाम्, अधत्त-अधद्ध्वम्. अदधाम्-अदधि, अदध्व-अदध्वहि. Perf. लिट्—दधौ-दधे, दधतुः-दधाते, दधुः-दधिरे. दधाथ-दधिथ-दधिषे, दधथुः-दधाथे, दध-दधिध्वे. दधौ-दधे, दधिव-दधिवहे. Aor. लुङ्—अधात्-अधित, अधाताम्-अधिषाताम्. अधाः-अधिथाः, अधातम्-अधिषाथाम्. अधाम्-अधिषि, अधाव-अधिष्वहि. Fu. लृट्—धास्यति-धास्यते. Per Fu. लुट्—धाता. Con.—लृङ्—अधास्यत्-अधास्यत. Ben. आशिषि लिङ्—धेयात्-धासीष्ट. Pas. कर्मणि—धीयते, Aor. कर्म-लुङ्—अधायि. Cau. णिजन्त—धापयति-धापयते, Aor. णिच्-लुङ्—अदीधपत्-त. Des. सनन्त—धित्सति-धित्सते. Fre. यङन्त—देधीयते. PP. निष्ठा—हितः. 1P. क्त्वा—हित्वा, प्र + धा = प्रधाय. Inf. तुमुन्—धातुम्.

धाव्—भ्वा U. से. गतिशुद्ध्योः, to flow, to run, to wash. Pre. लट्—धावति-ते. Pot. विधिलिङ्—धावेत्-त. Imp. लोट्—धावतु-ताम्. Impf. लङ्—अधावत्-त. Perf. लिट्—दधाव-दधावे, दधावतुः-दधावाते. Aor. लुङ्—अधावीत्-अधाविष्ट. अधावीः-अधाविष्ठाः. अधाविषम्-अधाविषि. Fu. लृट्—धाविष्यति-ते. Per Fu. लुट्—धाविता. Con. लृङ्—अधाविष्यत्-त. Ben. आशिषि-लिङ्—धाव्यात्-धाविषीष्ट. Cau. णिजन्त—धाव-

यति-ते. Aor. णिच्-लुङ्—अदीधवत्-त. Des. सनन्त—दिधाविषति-दिधाविषते. Fre. यङन्त—दाधाव्यते. PP. निष्ठा—धौतः-धावितः. IP. क्त्वा—धावित्वा धौत्वा. Inf. तुमुन्—धावितुम्.

धु—स्वा U. अ. कम्पने. to shake. Pre. लट्—धुनोति-धुनुते. Pot. विधिलिङ्—धुनुयात्-धुन्वीत. Imp. लोट्—धुनोतु-धुनुताम्. Impf. लङ्—अधुनोत्-अधुनुत. Perf. लिट्—दुधाव-दुधुवे. दुधविथ-दुधोथ-दुधुविषे. Aor. लुङ्—अधौषीत्-अधोष्ट. Fu. ऌट्—धोष्यति-ते. Per Fu. लुट्—धोता. Con. ऌङ्—अधोष्यत्-त. Ben. आशिषि-लिङ्—धूयात्-धोषीष्ट. Pas. कर्मणि—धूयते, Aor. कर्म-लुङ्—अधावि. Cau. णिजन्त—धावयति-ते, Aor. णिच्-लुङ्—अदूधवत्. Des. सनन्त—दुधूषति-ते. Fre. यङन्त—दोधूयते. PP. निष्ठा—धुतः. IP. क्त्वा—धुत्वा.

धू—तुदा P. से. विधूनने, to shake. Pre. लट्—धुवति. Pot. विधिलिङ्—धुवेत्. Imp. लोट्—धुवतु. Impf. लङ्—अधुवत्. Perf. लिट्—दुधाव, दुधुवतुः. दुधुविथ. दुधाव. Aor. लुङ्—अधुवीत्. Fu. ऌट्—धुविष्यति. Per Fu. लुट्—धुविता. Con. ऌङ्—अधुविष्यत्. Ben. आशिषि-लिङ्—धूयात्. Pas. कर्मणि—धूयते, Aor. कर्म-लुङ्—अधावि. Cau. णिजन्त—धावयति. Aor. णिच्-लुङ्—अदूधवत्. Des. सनन्त—दुधूषति. Fre. यङन्त—दोधूयते. PP. निष्ठा—धूतः. IP. क्त्वा—धूत्वा.

धू (धूञ्)—स्वा U. वे. कम्पने, to shake. Pre. लट्—धूनोति-धूनुते. Pot. विधिलिङ्—धूनुयात्-धून्वीत. Imp. लोट्—धूनोतु-धूनुताम्. Impf. लङ्—अधूनोत्-अधूनुत. Perf. लिट्—दुधाव-दुधुवे, दुधुवतुः-दुधुवाते. दुधविथ-दुधुविषे, दुधुवथुः-दुधुवाथे. दुधाव-दुधुवे, दुधुविव-दुधुविवहे. Aor. लुङ्—अधावीत्-अधविष्ट-अधोष्ट, अधाविष्टाम्. Fu. ऌट्—धोष्यति-धविष्यति-धोष्यते-धविष्यते. Per Fu. लुट्—धोता-धविता. Con. ऌङ्—अधोष्यत्-अधविष्यत्-अधोष्यत-अधविष्यत. Ben. आशिषि लिङ्—धूयात्-धोषीष्ट-धविषीष्ट. Pas. कर्मणि—धूयते, Aor. कर्म-लुङ्—अधावि. Cau. णिजन्त—धूनयति. Aor. णिच्-लुङ्—अदूधुनत्. Des. सनन्त—दुधूषति-ते. Fre. यङन्त—दोधूयते. PP. निष्ठा—धूतः. IP. क्त्वा—धूत्वा.

धू (धूञ्)—क्र्या U. वे, कम्पने, to shake. Pre. लट्—धुनाति-धुनीते. Pot. विधिलिङ्—धुनीयात्-धुनीत. Imp. लोट्—धुनातु-धुनीताम्. Impf. लङ्—अधुनात्-अधुनीत. Perf. लिट्—दुधाव-दुधुवे like स्वादि. Aor. लुङ्—अधावीत्-अधविष्ट-अधोष्ट like स्वादि. Fu. Per Fu, Con, Ben, Pas, Cau, Des, Fre, and IP. like स्वादि. PP. निष्ठा—धूनम्.

धू (धूञ्)—चुरा U. वे. कम्पने, to. shake. Pre. लट्—धूनयति-ते.

धूनोति चम्पकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तम्.

वायुर्विधूनयति चम्पकपुष्परेणून्,
यत्कानने धवति चन्दनमञ्जरीश्च.

धृ (धृञ्)—भ्वा U. से. अवस्थाने, धारणे, to exist, to hold, to bear, to support. भ्वादौ अवध्वंसनार्थकः चुरादौ धारणार्थकश्च धृञ् धातुर्नास्ति. Pre. लट्—धरति-धरते. Pct. विधिलिङ्—धरेत्-धरेत. Imp. लोट्—धरतु-धरताम्. Impf. लङ्—अधरत्-अधरत. Perf. लिट्—दधार-दध्रे, दध्रतुः-दध्राते. दधर्थ-दधृषे. दधार-दध्रे, दधृव-दधृवहे. Aoı. लुङ्—अधार्षीत्-अधृत. Fu. लृट्—धरिष्यति-धरिष्यते. Per Fu. लुट्—धर्ता. Con. लृङ्—अधरिष्यत्-त. Ben. आशिषि लिङ्—ध्रियात्-धृषीष्ट. Pas. कर्मणि—ध्रियते, Aor. कर्म-लुङ्—अधारि. Cau. णिजन्त—धारयति-ते, Aor. णिच्-लुङ्—अदीधरत्. Des. सनन्त—दिधरिषति-ते. Fre. यङन्त—देध्रीयते. PP. निष्ठा—धृतः. IP. क्त्वा—धृत्वा. Inf. तुमुन्—धर्तुम्.

भक्ताय धारयते मोक्षं हरिः.

ध्मा—भ्वा P. अ. शब्दाग्निसंयोगयोः, to blow as a conch, to blow fire. Pre. लट्—धमति. Pot. विधिलिङ्—धमेत्. Imp. लोट्—धमतु. Impf. लङ्—अधमत्. Perf. लिट्—दध्मौ. Aor. लुङ्—अध्मासीत्. Fu. लृट्—ध्मास्यति. Per Fu. लुट्—ध्माता. Con. लृङ्—अध्मास्यत्. Ben. आशिषि लिङ्—ध्मायात्-ध्मेयात्. Pas. कर्मणि—ध्मायते, Aor. कर्म-लुङ्—अध्मायि. Cau. णिजन्त—ध्मापयति, Aor. णिच्-लुङ्—अदिध्मपत्. Des. सनन्त—दिध्मासति.

Fre. यङन्त—देध्मीयते. PP. निष्ठा—ध्मातः. IP. क्त्वा—ध्मात्वा. Inf. तुमुन्—ध्मातुम्. ध्मा—इति शब्दार्थे, अग्नि-संयोगार्थे च. इहाग्निसंयोगः मुखवायुनाऽग्निसंयोगः. शङ्खं धमति. नाग्निं मुखेनोपधमेत्.

ध्यै—भ्वा P. अ. चिन्तायाम्, to think of. Pre. लट्—ध्यायति. Pot. विधिलिङ्—ध्यायेत्. Imp. लोट्—ध्यायतु. Impf. लङ्—अध्यायत्. Perf. लिट्—दध्यौ, दध्यतुः. दध्याथ-दध्यिथ. दध्यौ, दध्यिव. Aor. लुङ्—अध्यासीत्. Fu. लृट्—ध्यास्यति. Per Fu. लुट्—ध्याता. Con. लृङ्—अध्यास्यत्. Ben. आशिषि लिङ्—ध्यायात्-ध्येयात्. Pas. कर्मणि—ध्यायते, Aor. कर्म-लुङ्—अध्यायि. Cau. णिजन्त—ध्यापयति, Aor. णिच्-लुङ्—अदिध्यपत्. Des. सनन्त—दिध्यासति. Fre. यङन्त—दाध्यायते. PP. निष्ठा—ध्यातः. IP. क्त्वा—ध्यात्वा. Inf. तुमुन्—ध्यातुम्.

ध्वन्—भ्वा P. से, शब्दे, to sound, to echo. Pre. लट्—ध्वनति. Perf. लिट्—दध्वान. Aor. लुङ्—अध्वनीत्-अध्वानीत्. Fu. लृट्—ध्वनिष्यति. Per Fu. लुट्—ध्वनिता. Pas. भावे—ध्वन्यते. Cau. णिजन्त—ध्वानयति (ध्वनयति घण्टाम्—to ring a bell). PP. निष्ठा—ध्वनितः. Inf. तुमुन्— ध्वनितुम्.

न

नद् (णद्)—भ्वा P. अव्यक्ते शब्दे, to hum, to sound. Pre. लट्—नदति. Impf. लङ्—अनदत्. Perf. लिट्—ननाद, नेदतुः, नेदुः. नेदिथ. ननाद ननद, नेदिव. Aor. लुङ्—अनदीत्-अनादीत्. Fu. लृट्—नदिष्यति. Ben. आशिषि लिङ्—नद्यात्. Pas. भावे—नद्यते, Aor. भावे-लुङ्—अनादि. Cau. णिजन्त—नादयति, Aor. णिच्-लुङ्—अनीनदत्. Des. सनन्त—निनदिषति. Fre. यङन्त—नानद्यते. PP. निष्ठा—नदितः. IP. क्त्वा—नदित्वा. Inf. तुमुन्—नदितुम्.

प्र+नद्=प्रणदति, प्रणनाद.

प्र+नि+नद्=प्रणिनदति, प्रण्यनदत्.

नन्द् (नदि)—भ्वा P. से. आनन्दे, समृद्धौ, to be pleased, to thrive. Pre. लट्—नन्दति. Impf. लङ्—अनन्दत्. Perf. लिट्—ननन्द. Aor. लुङ्—अनन्दीत्. Fu. लृट्—नन्दिष्यति. Ben. आशिषि लिङ्—नन्द्यात्. Pas. भावे—नन्द्यते. Cau. णिजन्त—नन्दयति, Aor. णिच्-लुङ्—अननन्दत्. Des. सनन्त—निनन्दिषति. Fre. यङन्त—नानन्द्यते. PP. निष्ठा—नन्दितः. Inf. तुमुन्—नन्दितुम्.

नम्—भ्वा P. अ. प्रह्वत्वे, शब्दे, to bow, to salute, to sound. Pre. लट्—नमति. Pot. विधिलिङ्—नमेत्. Imp. लोट्—नमतु. Impf. लङ्—अनमत्. Perf. लिट्—ननाम, नेमतुः. नेमिथ-ननन्थ. ननाम-ननम. Aor. लुङ्—अनंसीत्, अनंसिष्टाम्, अनंसिषुः. अनंसीः. अनंसिषम्, अनंसिष्व. Fu. ऌट्—नंस्यति. Per Fu. लुट्—नन्ता. Con. ॡङ्—अनंस्यत्. Ben. आशिषि लिङ्—नम्यात्. Pas. कर्मणि—नम्यते, Aor. कर्म-लुङ्—अनामि. Cau. णिजन्त—नमयति-नामयति (but प्र+नम्=प्रणमयति), Aor. णिच्-लुङ्—अनीनमत्. Des. सनन्त—निनंसति. Fre. यङन्त—नंनम्यते. PP. निष्ठा—नतः, प्र+नम्=प्रणतः. IP. क्त्वा—नत्वा, प्र+नम्=प्रणत्य-प्रणम्य. Inf. तुमुन्—नन्तुम्.

नर्द्—भ्वा P. से. शब्दे, to roar, to sound. Pre. लट्—नर्दति. Perf. लिट्—ननर्द. Aor. लुङ्—अनर्दीत्. Fu. ऌट्—नर्दिष्यति. Per Fu. लुट्—नर्दिता. Con. ॡङ्—अनर्दिष्यत्. Ben. आशिषि लिङ्—नर्द्यात्. Pas. भावे—नर्द्यते, Aor. भावे-लुङ्—अनर्दि. Cau. णिजन्त—नर्दयति, Aor. णिच्-लुङ्—अननर्दत्. Des. सनन्त—निनर्दिषति. Fre. यङन्त—ननर्द्यते. PP. निष्ठा—नर्दितः. Inf. तुमुन्—नर्दितुम्.

नश् (णश्)—दिवा P.अ, अदर्शने, वलाद्यार्धधातुके परे रधादित्वाद् इड्विकल्पः. to perish, to be lost. Pre. लट्—नश्यति. Pot. विधिलिङ्—नश्येत्. Imp. लोट्—

नश्यतु. Impf. लङ्—अनश्यत्. Perf. लिट्—ननाश, नेशतुः, नेशुः. नेशिथ-ननंष्ठ, नेशथुः, नेश. ननाश-ननश, नेशिव-नेश्व. Aor. लुङ्—अनशत्-अनेशत्. अनशः-अनेशः. अनशम्-अनेशम्. Fu. लृट्—नशिष्यति-नङ्क्ष्यति. Per Fu. लुट्—नशिता-नंष्टा. Con. लृङ्—अनशिष्यत्-अनङ्क्ष्यत्. Ben. आशिषि लिङ्—नश्यात्. Pas. भावे—नश्यते, Aor. भावे-लुङ्—अनाशि. Cau. णिजन्त—नाशयति, Aor. णिच्-लुङ्—अनीनशत्. Des. सनन्त—निनशिषति-निनङ्क्षति. Fre. यङन्त—नानश्यते. PP. निष्ठा—नष्टः. IP. क्त्वा—नशित्वा-नष्ट्वा-नंष्ट्वा. Inf. तुमुन्—नशितुम्-नंष्टुम्.

नह् (णह्)—दिवा U. अ. बन्धने, to bind. Pre. लट्—नह्यति-ते. Perf. ननाह-नेहे. ननद्ध-नेहिथ-नेहिषे. ननाह-ननह-नेहे. Aor. लुङ्—अनात्सीत्-अनद्ध, अनाद्धाम्-अनत्साताम्, अनात्सुः-अनत्सत. अनात्सीः-अनद्धाः, अनाद्धम्-अनत्साथाम्, अनाद्ध-अनद्ध्वम्. अनात्सम्-अनत्सि, अनात्स्व-अनत्स्वहि, अनात्स्म-अनत्स्महि. Fu. लृट्—नत्स्यति-ते. Per Fu. लुट्—नद्धा. Ben. आशिषि लिङ्—नह्यात्-नत्सीष्ट. Pas. कर्मणि—नह्यते, Aor. कर्म-लुङ्—अनाहि. Cau. णिजन्त—नाहयति-ते, Aor. णिच्-लुङ्—अनीनहत्-त. Des. सनन्त—निनत्सति-ते. Fre. यङन्त—नानह्यते. PP. निष्ठा—नद्धः. IP. क्त्वा—नद्ध्वा, संनह्य.

निज् (णिजिर्)—जुहु U. अ. शौचपोषणयोः, to cleanse, to wash, to be purified, to nurture. Pre. लट्—नेनेक्ति-नेनिक्ते, नेनिक्तः-नेनिजाते, नेनिजति-

नेनिजते. नेनेक्षि-नेनिक्षे, नेनिक्थः-नेनिजाथे. नेनेज्मि-नेनिजे, नेनिज्वः-नेनिज्वहे. Pot. विधिलिङ्—नेनिज्यात्-नेनिजीत, नेनिज्याताम्-नेनिजीयाताम्. नेनिज्याः-नेनिजीथाः. नेनिज्याम्-नेनिजीय. Imp. लोट्—नेनेक्तु-नेनिक्ताम्. नेनिग्धि-नेनिक्ष्व. नेनिजानि-नेनिजै. Impf. लङ्—अनेनेक्-अनेनिक्त, अनेनिक्ताम्-अनेनिजाताम्, अनेनिजुः-अनेनिजत. अनेनेक्-अनेनिक्थाः. अनेनिजम्-अनेनिजि. Perf. लिट्—निनेज-निनिजे, निनिजतुः-निनिजाते. निनेजिथ-निनिजिषे, निनिजथुः-निनिजाथे. निनेज-निनिजे. निनिजिव-निनिजिवहे. Aor. लुङ्—अनिजत्-अनैक्षीत्-अनिक्त, अनिजताम्-अनैक्ताम्-अनिक्षाताम्, अनिजन्-अनैक्षुः-अनिक्षत. अनिजः-अनैक्षीः-अनिक्थाः, अनिजतम्-अनैक्तम्-अनिक्षाथाम्. अनिजम्-अनैक्षम्-अनिक्षि, अनिजाव-अनैक्ष्व-अनिक्ष्वहि, Fu. ऌट्—नेक्ष्यति-नेक्ष्यते. Per Fu. लुट्—नेक्ता. Con. ऌङ्—अनेक्ष्यत्-त. Ben. आशिषि-लिङ्—निज्यात्-निक्षीष्ट. Pas. कर्मणि—निज्यते, Aor. कर्म-लुङ्—अनेजि. Cau. णिजन्त—नेजयति-ते, Aor. णिच्-लुङ्—अनीनिजत्-त. Des. सनन्त—निनिक्षति-निनिक्षते. Fre. यङन्त—नेनिज्यते. PP. निष्ठा—निक्तः. IP. क्त्वा—निक्त्वा. Inf. तुमुन्—नेक्तुम्.

निन्द् (णिदि)—भ्वा P. से. कुत्सायाम्, to blame, to find fault with. Pre. लट्—निन्दति. Pot. विधिलिङ्—निन्देत्. Imp. लोट्—निन्दतु. Impf. लङ् अनिन्दत्. Perf. लिट्—निनिन्द, निनिन्दतुः. निनिन्दिथ, निनिन्दथुः. निनिन्द, निनिन्दिव. Aor. लुङ्—अनिन्दीत्. Fu. ऌट्—निन्दिष्यति. Per Fu. लुट्—निन्दिता. Con.

लृङ्—अनिन्दिष्यत्. Ben. आशिषि लिङ्—निन्द्यात्. Pas. कर्मणि—निन्द्यते, Aor. कर्म-लुङ्—अनिन्दि. Cau. णिजन्त—निन्दयति, Aor. णिच्-लुङ्—अनिनिन्दत्. Des. सनन्त—निनिन्दिषति. PP. निष्ठा—निन्दितः. IP. क्त्वा—निन्दित्वा. Inf. तुमुन्—निन्दितुम्.

प्र+निन्द=प्रणिन्दति. 'प्रणिन्दितः-प्रनिन्दितः.

नी (णीञ्)—भ्वा U. द्विकर्मकः, प्रापणे, to lead, to carry off, to marry, to settle. Pre. लट्—नयति-ते. Pot. विधिलिङ्—नयेत्-त. Imp. लोट्—नयतु-नयताम्. Impf. लङ्—अनयत्-अनयत. Perf. लिट्—निनाय-निन्ये, निन्यतुः-निन्याते, निन्युः-निन्यिरे. निनयिथ-निनेथ-निन्यिषे,निन्यथुः-निन्याथे, निन्य-निन्यिध्वे. निनाय-निनय-निन्ये, निन्यिव-निन्यिवहे, निन्यिम-निन्यिमहे. Aor. लुङ्—अनैषीत्-अनेष्ट. Fu. लृट्—नेष्यति-नेष्यते. Per Fu. लुट्—नेता. Con. लृङ्—अनेष्यत्-त. Ben.—आशिषि लिङ्—नीयात्-नेषीष्ट. Pas. कर्मणि-नीयते, Aor. कर्म-लुङ्—अनायि. Cau. णिजन्त—नाययति-ते, Aor. णिच्लुङ्—अनीनयत्-त. Des. सनन्त—निनीषति-ते. Fre. यङन्त—नेनीयते. Kri. कृत्य—नेतव्यः, PP. निष्ठा—नीतः. IP. क्त्वा—नीत्वा. Inf. तुमुन्—नेतुम्. नाययति अजां यज्ञदत्तेन देवदत्तः. Atmanepada.—शास्त्रे नयते (पूजार्थे). पुत्रमुदानयते (उत्क्षेपणार्थे). मानवकमुपनयते (आचार्यकरणार्थे). नयते शास्त्रे (प्रमेयनिश्चयार्थे). अत्र अकर्मकः कर्मकरानुपनयते (वेतनार्थे). ऋणं विनयते (निर्यातनार्थे). शतं विनयते (धर्मादिविनियोगार्थे).

नुद् (गुद्)—तुदा U. अ. प्रेरणे, to throw, to put. Pre. लट्—नुदति-ते. Like. तुदति. Perf. लिट्—नुनोद-नुनुदे. Aor. लुङ्—अनौत्सीत्-अनुत्त. Fu. लृट्—नोत्स्यति-ते. Ben. आशिषि-लिङ्—नुद्यात्. Pas. कर्मणि—नुद्यते, Aor. कर्म-लुङ्—अनोदि. Cau. णिजन्त—नोदयति-ते, Aor. णिच्-लुङ्—अनूनुदत्-त. Des. सनन्त—नुनुत्सति-ते. Fre. यङन्त—नोनुद्यते. PP. निष्ठा—नुत्तः-नुन्नः. IP. क्त्वा—नुत्त्वा.

नृत् (नृती)—दिवा P. से. नृतौ, to dance. Pre. लट्—नृत्यति. Pot. विधिलिङ्—नृत्येत्. Imp. लोट्—नृत्यतु. Impf. लङ्—अनृत्यत्. Perf. लिट्—ननर्त, ननृततुः. ननर्तिथ. ननर्त. Aor. लुङ्—अनर्तीत्, अनर्तिष्टाम्. Fu. लृट्—नर्तिष्यति-नर्त्स्यति. Per Fu. लुट्—नर्तिता. Ben. आशिषि-लिङ्—नृत्यात्. Pas. (भावे)—नृत्यते, Aor. भावे-लुङ्—अनर्ति. Cau. णिजन्त—नर्तयति-ते, कर्त्रभिप्राये क्रियाफले यत्र परस्मैपदं प्राप्तं तत्र 'न पादम्याङ्' (१।३।८९) इत्यादिना निषिध्यते. Aor. णिच्-लुङ्—अनीनृतत्-अननर्तत्. Des. सनन्त—निनर्तिषति-निनृत्सति. Fre. यङन्त—नरीनृत्यते. PP. निष्ठा—नृत्तः. IP. क्त्वा—नर्तित्वा. Inf. तुमुन्—नर्तितुम्. प्रनृत्यति. नृत्यम्=पदार्थाभिनयः. नृत्तम्=गात्राभिनयमात्रम्.

प

पच्—भ्वा U. अ. पाके, to cook, to digest. Pre. लट्—पचति-पचते. Pot. विधिलिङ्—पचेत्-त. Imp. लोट्—पचतु-पचताम्. Impf. लङ्—अपचत्-त. Perf. लिट्—पपाच-पेचे, पेचतुः-पेचाते ; पेचिथ-पपक्थ-पेचिषे, पेचथुः-पेचाथे ; पपाच-पपच-पेचे, पेचिव-पेचिवहे. Aor. लुङ्—अपाक्षीत्-अपक्त, अपाक्षीः-अपक्थाः. अपाक्षम्-अपक्षि. Fu. लृट्—पक्ष्यति-पक्ष्यते. Per Fu. लुट्—पक्ता. Con. लृङ्—अपक्ष्यत्-अपक्ष्यत. Ben. आशिषि-लिङ्—पच्यात् पक्षीष्ट. Pas. कर्मणि—पच्यते, Aor. कर्म-लुङ्—अपाचि. Cau. णिजन्त—पाचयति-ते, Aor. णिच्-लुङ्—अपीपचत्-त. Des. सनन्त—पिपक्षति-ते. Fre. यङन्त—पापच्यते. Kri. कृत्य—पचनीयः. PP. निष्ठा—पक्वः. IP. क्त्वा—पक्त्वा. Inf. तुमुन्—पक्तुम्.

पठ्—भ्वा P. से. व्यक्तायां वाचि, to read, to study. Pre. लट्—पठति. Pot. विधिलिङ्—पठेत्. Imp. लोट्—पठतु. Impf. लङ्—अपठत्. Perf. लिट्—पपाठ, पेठतुः. पेठिथ. पपाठ, Aor. लुङ्—अपठीत्-अपाठीत्. Fu. लृट्—पठिष्यति. Per Fu. लुट्—पठिता. Con. लृङ्—अपठिष्यत्. Ben. आशिषि लिङ्—पठ्यात्. Pas. कर्मणि—पठ्यते. Aor, कर्म-लुङ्—अपाठि. Cau. णिजन्त—पाठयति, Aor. णिच्-लुङ्—अपीपठत्. Des. सनन्त—पिपठिषति.

Fre. यङन्त—पापठ्यते. Kri. कृत्य—पठितव्यः, पठनीयः. PP. निष्ठा—पठितः. IP. क्त्वा—पठित्वा. Inf. तुमुन्—पठितुम्.

पत् (पत्लृ)—भ्वा P. से. पतने, to fall, to fly. Pre. लट्—पतति. Pot. विधिलिङ्—पतेत्. Imp. लोट्—पततु. Impf. लङ्—अपतत्. Perf. लिट्—पपात, पेततुः. पेतिथ, पेतथुः. पपात-पपत, पेतिव. Aor. लुङ्—अपप्तत्, अपप्तताम्, अपप्तन्. अपप्तः, अपप्ततम्. अपप्तम्, अपप्ताव. Fu. ऌट्—पतिष्यति. Per Fu. लुट्—पतिता. Con. ऌङ्—अपतिष्यत्. Ben. आशिषि-लिङ्—पत्यात्. Pas. भावे—पत्यते, Aor. भावे-लुङ्—अपाति. Cau. णिजन्त—पातयति, Aor. णिच्-लुङ्—अपीपतत्. Des. सनन्त—पिपतिषति-पित्सति. Fre. यङन्त—पनीपत्यते. PP. निष्ठा—पतितः. IP. क्त्वा—पतित्वा. Inf. तुमुन्—पतितुम्. नरकं पतितः = नरकपतितः. स्वर्गपतितः.

पत—चुरा P. से. गतौ (अदन्तोऽयम्), to go. Pre. लट्—पतयति-पतति. Perf. लिट्—पतयां चकार. Like. कथ.

पद्—दिवा A. अ. गतौ, to go. Pre. लट्—पद्यते. Pot. विधिलिङ्—पद्येत. Imp. लोट्—पद्यताम्. Impf. लङ्—अपद्यत. Perf. लिट्—पेदे. पेदिषे. Aor. लुङ्—अपादि, अपत्साताम्. Fu. ऌट्—पत्स्यते. Per Fu. लुट्—पत्ता. Con. ऌङ्—अपत्स्यत. Ben. आशिषि लिङ्—पत्सीष्ट. Pas. कर्मणि—पद्यते. Aor. कर्म-लुङ्—अपादि.

Cau. णिजन्त—पादयति. Aor. णिच्-लुङ्—अपीपदत्. Des. सनन्त—पित्सते. Fre. यङन्त—पनीपद्यते. PP. निष्ठा—पन्नः. IP. क्त्वा—पत्त्वा. Inf. तुमुन्—पत्तुम्.

पण्-पन्—भ्वा A. से. स्तुतौ, to praise. आभ्यां स्तुत्यर्थे एव आयप्रत्ययः, आयप्रत्ययान्तादेव परस्मैपदम्. लिडादौ आयप्रत्ययो भवति न भवति च. Pre. लट्—पणायति, पनायति. Pot. विधिलिङ्—पणायेत्. पनायेत्. Imp. लोट्—पणायतु, पनायतु. Impf. लङ्—अपणायत्, अपनायत्. व्यवहाराद्यर्थे पणते इत्यादि. Perf. लिट्—पणायाञ्चकार-पेणे. Aor. अपणायीत्-अपणिष्ट. Fu. लृट्—पणायिष्यति-पणिष्यते. Per Fu. लुट्—पणायिता-पणिता. Con. लृङ्—अपणायिष्यत्-अपणिष्यत. Ben. आशिषि लिङ्—पणाय्यात्-पणिषीष्ट. Pas कर्मणि—पण्यते, Aor. कर्म-लुङ्—अपाणि. Cau. णिजन्त—पाणयति, Aor. णिच्-लुङ्—अपीपणत्. Des. सनन्त—पिपणिषते. Fre. यङन्त—पम्पण्यते. PP. निष्ठा—पणायितः-पणितः. IP. क्त्वा—पणायित्वा-पणित्वा. Inf. तुमुन्—पणितुम्-पणायितुम्.

पा—भ्वा P. अ. पाने, to drink. Pre. लट्—पिबति. पिबसि. पिबामि. Pot. विधिलिङ्—पिबेत्. पिबेः. पिबेयम्. Imp. लोट्—पिबतु. पिब. पिबानि. Impf. लङ्—अपिबत्. अपिबः अपिबम्. Perf. लिट्—पपौ, पपतुः, पपुः. पपिथ-पपाथ, पपथुः, पपौ पपिव. Aor. लुङ्—अपात्, अपाताम्, अपुः. अपाः. अपाम्. Fu. लृट्—पास्यति. Per Fu. लुट्—पाता. Con. लृङ्—अपास्यत्. Ben. आशिषि

लिङ्—पेयात्. Pas. कर्मणि—पीयते, Aor. कर्म-लुङ्—अपायि. Cau. णिजन्त—पाययति (निगरणार्थे—पापयते to swallow), Aor. णिच्-लुङ्—अपीप्यत. Des. सनन्त—पिपासति. Fre. यङन्त—पेपीयते. Kri. कृत्य—पातव्यः, पानीयः, पेयः. PP. निष्ठा—पीतः. IP. क्त्वा—पीत्वा, प्र+पा=प्रपाय. Inf. तुमुन्—पातुम्.

पा—अदा P. अ. पालने, to protect. Pre. लट्—पाति. Pot. विधिलिङ्—पायात्. Imp. लोट्—पातु. पाहि. Impf. लङ्—अपात्. Perf. लिट्—पपौ. Aor. लुङ्—अपासीत्. Fu. लृट्—पास्यति. Per Fu. लुट्—पाता. Con. लृङ्—अपास्यत्. Ben. आशिषि लिङ्—पायात्. Pas. कर्मणि—पायते, Aor. कर्म-लुङ्—अपायि. Cau. णिजन्त—पालयति, Aor. णिच्-लुङ्—अपीपलत्. Des. सनन्त—पिपासति. PP. निष्ठा—पातः. Inf. तुमुन्—पातुम्.

पाल—चुरा U. रक्षणे to protect. Pre. लट्—पालयति-ते. Pot. विधिलिङ्—पालयेत्-त. Imp. लोट् पालयतु-ताम्. Impf. लङ्—अपालयत्-त. Perf. लिट्—पालयां चकार-चक्रे. Aor. लुङ्—अपीपलत्-त. Fu. लृट्—पालयिष्यति-ते. Per. Fu. लुट्—पालयिता. Con. लृङ्—अपालयिष्यत्-त. Ben. आशिषि लिङ्—पाल्यात्-पालयिषीष्ट. Pas. कर्मणि—पाल्यते, Aor. कर्म-लुङ्—अपालि. PP. निष्ठा—पालितः. IP. क्त्वा—पालयित्वा. Inf. तुमुन्—पालयितुम्.

पिष् (पिष्लृ)—रुधा P. अ. सञ्चूर्णने, to grind, to hurt. Pre. लट्—पिनष्टि, पिंष्टः, पिंषन्ति. पिनक्षि, पिंष्ठः, पिंष्ठ. पिनष्मि, पिंष्वः, पिंष्मः. Pot. विधिलिङ्—पिंष्यात्. पिंष्याः. पिंष्याम्. Imp. लोट्—पिनष्टु. पिण्ड्ढि. पिनषाणि. Impf. लङ्—अपिनट्, अपिंष्टाम्. अपिनट्, अपिंष्टम्. अपिनषम्, अपिंष्व. Perf. लिट्—पिपेष, पिपिषतुः. पिपेषिथ, पिपिषथुः. पिपेष, पिपिषिव. Aor. लुङ्—अपिषत्. अपिषः. अपिषम्. Fu. लृट्—पेक्ष्यति. Per Fu. लुट्—पेष्टा. Con. लृङ्—अपेक्ष्यत्. Ben. आशिषि-लिङ्—पिष्यात्. Pas. कर्मणि—पिष्यते, Aor. कर्म-लुङ्—अपेषि. Cau. णिजन्त—पेषयति, Aor. णिच्-लुङ्—अपीपिषत्. Des. सनन्त—पिपिक्षति. Fre. यङन्त—पेपिष्यते. PP. निष्ठा—पिष्टः. IP. क्त्वा—पिष्ट्वा. Inf. तुमुन्—पेष्टुम्.

पीड्—चुरा U. से. पीड़ायाम्, to press. to hurt. Pre. लट्—पीडयति-ते. Pot. विधिलिङ्—पीडयेत्-त. Imp. लोट्—पीडयतु-पीडयताम्. Impf. लङ्—अपीडयत्-त. Perf. लिट्—पीडयांचकार-चक्रे. Aor. लुङ्—अपीपिडत्-त-अपिपीडत्-त. Fu. लृट्—पीडयिष्यति-ते. Per Fu. लुट्—पीडयिता. Con. लृङ्—अपीडयिष्यत्-त. Ben. आशिषि-लिङ्—पीड्यात्-पीडयिषीष्ट. Pas. कर्मणि—पीड्यते, Aor. कर्म-लुङ्—अपीडि. Des. सनन्त—पिपीडयिषति-ते PP. निष्ठा—पीडितः. IP. क्त्वा—पीडयित्वा. Inf. तुमुन्—पीडयितुम्.

पुष्—भ्वा P. से. पुष्टौ, to nourish, to develop. Pre. लट्—पोषति. Pot. विधिलिङ्—पोषेत्. Imp. लोट्—पोषतु. Impf. लङ्—अपोषत्. Perf. लिट्—पुपोष, पुपुषतुः. पुपोषिथ, पुपुषथुः. पुपोष, पुपुषिव. Aor. लुङ्—अपोषीत्. अपोषीः. अपोषिषम्. Fu. लृट्—पोषिष्यति. Per Fu. लुट्—पोषिता. Con. लृङ्—अपोषिष्यत्. Ben. आशिषि-लिङ्—पुष्यात्. Pas. कर्मणि—पुष्यते. Aor. कर्म-लुङ्—अपोषि. Cau. णिजन्त—पोषयति, Aor. णिच्-लुङ्—अपूपुषत्. Des. सनन्त—पुपुषिषति-पुपोषिषति. Fre. यङन्त—पोपुष्यते. Kri. कृत्य—पोषणीयः. PP. निष्ठा—पुषितः. IP. क्त्वा—पोषित्वा. Inf. तुमुन्—पोषितुम्.

पुष्—दिवा P. अ. पुष्टौ, to nourish, to develop. Pre. लट्—पुष्यति. Pot. विधिलिङ्—पुष्येत्. Imp. लोट्—पुष्यतु. Impf. लङ्—अपुष्यत्. Perf. लिट्—पुपोष. पुपोषिथ. पुपोष. Aor. लुङ्—अपुषत्. अपुषः. अपुषम्. Fu. लृट्—पोक्ष्यति. Per Fu. लुट्—पोष्टा. Con. लृङ्—अपोक्ष्यत्. Ben. आशिषि-लिङ्—पुष्यात्. Pas. कर्मणि—पुष्यते, Aor. कर्म-लुङ्—अपोषि. Cau. णिजन्त—पोषयति, Aor. णिच्-लुङ्—अपूपुषत्. Des. सनन्त—पुपुक्षति. Fre. यङन्त—पोपुष्यते. PP. निष्ठा—पुष्टः.

पुष्—क्र्या P. से. पुष्टौ, to nourish. Pre. लट्—पुष्णाति, पुष्णीतः, पुष्णन्ति. पुष्णासि, पुष्णीथः, पुष्णीथ. पुष्णामि, पुष्णीवः. Pot. विधिलिङ्—पुष्णीयात्, पुष्णीयाताम्, पुष्णीयुः. पुष्णीयाः. पुष्णीयाम्. Imp. लोट्—पुष्णातु, पुष्णी-

ताम्, पुष्णन्तु. पुष्णाण. पुष्णानि. Impf. लङ्—अपुष्णात्, अपुष्णीताम्, अपुष्णन्. अपुष्णा:. अपुष्णाम्, अपुष्णीव, अपुष्णीम. Perf. लिट्—पुपोष, पुपुषतु:, पुपुषु:. पुपोषिथ, पुपुषथु:, पुपुष. पुपोष, पुपुषिव, पुपुषिम. Aor. लुङ्—अपोषीत् like पोषति.

पुष्—चुरा U. से. धारणे, to promote, to maintain. Pre.—पोषयति-ते. पोषयत्याभरणम्. Perf. लिट्—पोषयां-चकार-चक्रे. Aor. लुङ्—अपूपुषत्.

पुष्प्—दिवा P. से. विकसने, to open, to blow. Pre. लट्—पुष्प्यति. Pot. विधिलिङ्—पुष्प्येत्. Imp. लोट्—पुष्प्यतु. Impf. लङ्—अपुष्प्यत्. Perf. लिट्—पुपुष्प. पुपुष्पिथ. पुपुष्प. Aor. लुङ्—अपुष्पीत्. Fu. लृट्—पुष्पिष्यति. Per Fu. लुट्—पुष्पिता. Ben. आशिषि लिङ्—पुष्प्यात्. Pas. भावे—पुष्प्यते, Aor. भावे-लुङ्—अपुष्पि. Cau. णिजन्त—पुष्पयति. Aor. णिच्-लुङ्—अपुपुष्पत्. Des. सनन्त—पुपुष्पिषति. Fre. यङन्त—पोपुष्प्यते, PP. निष्ठा—पुष्पित:. IP. क्त्वा—पुष्पित्वा. Inf. तुमुन्—पुष्पितुम्.

पू (पूङ्)—भ्वा A. से. पवने, to purify, to winnow, to invent. Pre. लट्—पवते. Pot. विधिलिङ्—पवेत. Imp. लोट्—पवताम्. Impf. लङ्—अपवत. Perf. लिट्—पुपुवे. पुपुविषे. Aor. लुङ्—अपविष्ट. Fu. लृट्—पविष्यते. Per Fu. लुट्—पविता. Ben. आशिषि लिङ्—पविषीष्ट. Pas. कर्मणि—पूयते,

Aor. कर्म-लुङ्—अपावि. Cau. णिजन्त—पावयति, Aor. णिच्-लुङ्—अपीपवत्. Des. सनन्त—पिपविषते. Fr. यङन्त—पोपूयते. PP. निष्ठा—पूतः-पवितः. IP. क्त्वा—पूत्वा-पवित्वा. Inf. तुमुन्—पवितुम्.

पू (पूञ्)—क्र्या U. से. पवने (पवनं पूतीकरणम्, सकर्मकोऽयम्, to purify. Pre. लट्—पुनाति-पुनीते. पुनात्यग्निम्, पुनीते आत्मानम्, पुनासि-पुनीषे. पुनामि-पुने. Pot. विधिलिङ्—पुनीयात्-पुनीत. पुनीयाः-पुनीथाः. पुनीयाम्-पुनीय. Imp. लोट्—पुनातु-पुनीताम्. पुनीहि-पुनीष्व. पुनानि-पुनै. Impf. लङ्—अपुनात्-अपुनीत, अपुनीताम्-अपुनाताम्. अपुनाः-अपुनीथाः, अपुनीतम्-अपुनाथाम्. अपुनाम्-अपुनि, अपुनीव-अपुनीवहि. Perf. लिट्—पुपाव-पुपुवे, पुपुवुः-पुपुविरे. पुपविथ-पुपुविषे. पुपुवे-पुपाव, पुपुविव-पुपुविवहे. Aor. लुङ्—अपावीत्-अपविष्ट, अपाविष्टाम्-अपविषातान्, अपाविषुः-अपविषत Fu. लृट्—पविष्यति-ते. Ben. आशिषि लिङ्—पूयात्-पविषीष्ट. Cau. णिजन्त—like पूङ्. Des. सनन्त—पुपूषति-ते. Fre.—like. पूञ्. PP. निष्ठा—पूतः (विनाशार्थे—पूनः). IP. क्त्वा—पूत्वा. Inf. तुमुन्—पवितुम्.

पूज्—चुरा U. से. पूजायाम्, to adore, to receive with honour, to present with. Pre. लट्—पूजयति-ते. Perf. लिट्—पूजयां चकार-चक्रे. Aor. लुङ्—अपूपुजत्-त. Fu. लृट्—पूजयिष्यति-ते. PP. निष्ठा—पूजितः. IP. क्त्वा—पूजयित्वा. Inf. तुमुन्—पूजयितुम्.

पूर् (पूरी)—दिवा A. से. आप्यायने, to satisfy. Pre. लट्—पूर्यते. Perf. लिट्—पुपूरे. Aor. लुङ्—अपूरिष्ट-अपूरि. Per Fu. लुट्—पूरिता. Ben. आशिषि लिङ्—पूरिषीष्ट, Pas. कर्मणि—पूर्यते, Aor. कर्म-लुङ्—अपूरि, Cau. णिजन्त—पूरयति, Aor. णिच्-लुङ्—अपूपुरत्. Des. सनन्त—पुपूरिषते. Fre. यङन्त—पोपूर्यते. PP. निष्ठा—पूर्णः. Inf. तुमुन्—पूरितुम्.

पूर् (पूरी)—चुरा. U. से. आप्यायने, to fill. Pre. लट्—पूरयति-ते. Perf. लिट्—पूरयां चकार-चक्रे. Aor. लुङ्—अपूपुरत्-त. PP. निष्ठा—पूरितः. IP. क्त्वा—पूरयित्वा. Inf. तुमुन्—पूरयितुम्.

पृ (पृङ्)—तुदा A. अ. व्यायामे, प्रायेणायं व्याङ्-पूर्वः, to be busy, to be active, (mostly used with व्या). Pre. लट्—व्याप्रियते. Pot. विधिलिङ्—व्याप्रियेत. Imp. लोट्—व्याप्रियताम्. Impf. लङ्—व्याप्रियत. Perf. लिट्—व्यापप्रे. व्यापप्रिषे. व्यापप्रे. Aor. लुङ्—व्यापृत, व्यापृषाताम्, व्यापृषत. व्यापृथाः. व्यापृषि. Fu. लृट्—व्यापरिष्यते. Per Fu. लुट्—व्यापर्ता. Con. लृङ्—व्यापरिष्यत. Ben. आशिषि-लिङ्—व्यापृषीष्ट. Pas. भावे—व्याप्रियते. Cau. णिजन्त—व्यापारयति, Aor. णिच्-लुङ्—व्यापीपरत्. Des. सनन्त—व्याप्पुपूर्षते. Fre. यङन्त—व्यापेप्रीयते. PP. निष्ठा—व्यापृतः. IP. क्त्वा—व्यापृत्य. Inf. तुमुन्—व्यापर्तुम्.

पृ—स्वा. P. अ. to be satisfied. प्रीत्यर्थे. Pre. लट्—पृणोति. Pot. विधिलिङ्—पृणुयात्. Imp. लोट्—पृणोतु. Impf. लङ्—अपृणोत्. Perf. लिट्—पपार, पप्रतुः. पपर्थ, पप्रथुः. पपार, पप्रिव. Aor. लुङ्—अपार्षीत्. Fu. लृट्—परिष्यति. Per. Fu. लुट्—पर्ता. Con. लृङ्—अपरिष्यत्. Ben. आशिषि-लिङ्—प्रियात्. Pas. भावे—प्रियते. Cau. णिजन्त—पारयति, Aor. णिच्-लुङ्—अपीपरत्. Des. सनन्त—पुपूर्षति. Fre. यङन्त—पेप्रीयते. PP. निष्ठा—पृतः. IP. क्त्वा—पृत्वा. Inf. तुमुन्—पर्तुम्.

पॄ—क्र्या P. से. पालनपूरणयोः to guard, to fill, Pre. लट्—पृणाति. Pot. विधिलिङ्—पृणीयात्. Imp. लोट्—पृणातु. पृणीहि. पृणानि. Impf. लङ्—अपृणात्. Perf. लिट्—पपार, पपरतुः-पप्रतुः, पपरुः-पप्रुः. पपरिथ, पपरथुः-पप्रथुः, पपर, पप्र. पपर-पपार, पपरिव-पप्रिव, पपरिम-पप्रिम. Aor. लुङ्—अपारीत्, अपारिष्टाम्. Fu. लृट्—परिष्यति-परीष्यति. Per Fu. लुट्—परिता-[illegible]रीता. Con. लृङ्—अपरिष्यत्-अपरीष्यत्. Ben. आशिषि लिङ्—पूर्यात्. Pas. कर्मणि—पूर्यते. Cau. णिजन्त—पारयति, Aor. णिच्-लुङ्—अपीपरत्, Des. सनन्त—पिपरिषति-पिपरीषति-पुपूर्षति. Fre. यङन्त—पोपूर्यते. PP. निष्ठा—पूर्त्तः. IP. क्त्वा—पूर्त्वा.

पॄ—जुहु P. से. पालनपूरणयोः, to guard, to fill, Pre. लट्—पिपर्ति, पिपूर्तः, पिपुरति. पिपर्षि, पिपूर्थः,

पिपूर्थ. पिपर्मि, पिपूर्वः, पिपूर्मः. Pot. विधिलिङ्—पिपूर्यात्, पिपूर्याताम्. पिपूर्याः. पिपूर्याम्. Imp. लोट्—पिपर्तु, पिपूर्ताम्. पिपूर्हि. पिपराणि. Impf. लङ्—अपिपः, अपिपूर्ताम्, अपिपरुः. अपिपः, अपिपूर्तम्. अपिपरम्, अपिपूर्व, अपिपूर्म. Perf. लिट्—पपार-पपर, पप्रिव-पपरिव ; पप्रिम-पपरिम. like पृणाति.

पॄ—चुरा U. से. पूरणे, to fill. Pre. लट्—पारयति. Etc.

प्याय् (ओप्यायी)—भ्वा A. अ. वृद्धौ, to grow, to swell, to increase. Pre. लट्—प्यायते. Pot. विधिलिङ्—प्यायेत. Imp. लोट्—प्यायताम्. Impf. लङ्—अप्यायत. Perf. लिट्—पिप्ये, पिप्याते, पिप्यिरे. पिप्यिषे. पिप्ये, पिप्यिवहे, पिप्यिमहे. Aor. लुङ्—अप्यायि-अप्यायिष्ट. Fu. लृट्—प्यायिष्यते. Per Fu. लुट्—प्यायिता. Con. लृङ्—अप्यायिष्यत. Ben. आशिषि-लिङ्—प्यायिषीष्ट. Pas. भावे—प्याय्यते, Aor. भावे-लुङ्—अप्यायि. Cau. णिजन्त--प्याययति, Aor. णिच्-लुङ्—अपिप्ययत्. Des. सनन्त--पिप्यायिषते. Fre. यङन्त—पेपीयते. PP. निष्ठा—प्यानः-पीनः ; स्वाङ्गे—पीनम्. उपसर्गान्न—प्रप्यानः, आपूर्वात्—आपीनः अन्धुः, आपीनमुधः. IP. क्त्वा—प्यायित्वा. Inf. तुमुन्—प्यायितुम्.

प्रच्छ् (छ्)—तुदा P. अ. ज्ञीप्सायाम्, to ask. Pre. लट्—पृच्छति. पृच्छसि. पृच्छामि. Pot. विधिलिङ्—पृच्छेत्. पृच्छेः. पृच्छेयम्. Imp. लोट्—पृच्छतु. पृच्छ. पृच्छानि.

Impf. लङ्—अपृच्छत्. अपृच्छः. अपृच्छम्. Perf. लिट्—पप्रच्छ. पप्रच्छिथ-पप्रष्ठ. पप्रच्छ, पप्रच्छिव. Aor. लुङ्—अप्राक्षीत् अप्राष्टाम्, अप्राक्षुः. अप्राक्षीः, अप्राष्टम्, अप्राष्ट. अप्राक्षम्, अप्राक्ष्व, अप्राक्ष्म. Fu. लृट्—प्रक्ष्यति, प्रक्ष्यतः. प्रक्ष्यसि. प्रक्ष्यामि, प्रक्ष्यावः. Per Fu लुट्—प्रष्टा. प्रष्टासि. प्रष्टास्मि. Con. लृङ्—अप्रक्ष्यत्. अप्रक्ष्यः. अप्रक्ष्यम्. Ben. आशिषि-लिङ्—पृच्छ्यात्. पृच्छ्याः. पृच्छ्यासम्. Pas. कर्मणि पृच्छ्यते. Cau. णिजन्त—प्रच्छयति, Aor. णिच्-लुङ्—अपप्रच्छत्. Des. सनन्त—पिपृच्छिषति. Fre. यङन्त—परीपृच्छ्यते. Kri. कृत्य—प्रष्टव्यः. PP. निष्ठा—पृष्टः. IP. क्त्वा—पृष्ट्वा. Inf. तुमुन्—प्रष्टुम्.

प्रथ्—भ्वा A. से. प्रख्याने, to become famous, to increase, to rise. Pre. लट्—प्रथते. Pot. प्रथेत. Imp. लोट्—प्रथताम्. Impf. लङ्—अप्रथत. Perf. लिट्—पप्रथे. Aor. लुङ्—अप्रथिष्ट. Fu. लृट्—प्रथिष्यते. Per Fu. लुट्—प्रथिता. Con. लृङ्—अप्रथिष्यत. Ben. आशिषि लिङ्—प्रथिषीष्ट. Pas. कर्मणि—प्रथ्यते, Aor. कर्म-लुङ्—अप्राथि. Cau. णिजन्त—प्रथयति, Aor. णिच्-लुङ्—अपप्रथत्. Des. सनन्त—पिप्रथिषते. PP. निष्ठा—प्रथितः. IP. क्त्वा—प्रथित्वा. Inf. तुमुन्—प्रथितुम्.

प्रथ्—चुरा U. से. प्रख्याने, to become famous. Pre. लट्—प्राथयति-ते. Perf. लिट्—प्राथयां चकार-चक्रे. Aor. लुङ्—अपप्रथत्. Per Fu. लुट्—प्राथयिता. etc.

प्री (प्रीङ्)—दिवा A. अ. प्रीतौ, to be satisfied, to feel affection. Pre. लट्—प्रीयते. Pot. विधिलिङ्—प्रीयेत. Imp. लोट्—प्रीयताम्. Impf. लङ्—अप्रीयत. Perf. लिट्—पिप्रिये. Aor. लुङ्—अप्रेष्ट. Fu. लृट्—प्रेष्यते. Per Fu. लुट्—प्रेता. Con. लृङ्—अप्रेष्यत. Ben. आशिषि लिङ्—प्रेषीष्ट. Pas.—प्रीयते (भावे). Cau. णिजन्त—प्राययति, Aor. णिच्-लुङ्—अपिप्रयत्. Des. सनन्त—पिप्रीषते. Fre. यङन्त—पेप्रीयते. PP. निष्ठा—प्रीतः. IP. क्त्वा—प्रीत्वा. Inf. तुमुन्—प्रेतुम्.

प्री (प्रीञ्)—क्र्या U. अ. तर्पणे, कान्तौ च, कान्तिः = कामना, to please, to take delight in, to desire. Pre. लट्—

प्रीणाति	प्रीणीतः	प्रीणन्ति
प्रीणीते	प्रीणाते	प्रीणते
प्रीणासि	प्रीणीथः	प्रीणीथ
प्रीणीषे	प्रीणाथे	प्रीणीध्वे
प्रीणामि	प्रीणीवः	प्रीणीमः
प्रीणे	प्रीणीवहे	प्रीणीमहे

Pot. विधिलिङ्—प्रीणीयात्-प्रीणीत, प्रीणीयाताम्-प्रीणीयाताम्, प्रीणीयुः-प्रीणीरन्. प्रीणीयाः-प्रीणीथाः, प्रीणीयातम्-प्रीणीयाथाम्. प्रीणीयाम्-प्रीणीय, प्रीणीयाव-प्रीणीवहि. Imp. लोट्—प्रीणातु-प्रीणीताम्. प्रीणीहि-प्रीणीष्व. प्रीणानि-प्रीणै.

Impf. लङ्—अप्रीणात्-अप्रीणीत. अप्रीणाः-अप्रीणीथाः. अप्रीणाम्-अप्रीणि. Perf. लिट्—पिप्राय-पिप्रिये, पिप्रियतुः-पिप्रियाते. पिप्रयिथ-पिप्रेथ-पिप्रियिषे, पिप्रियथुः-पिप्रियाथे. पिप्राय-पिप्रय-पिप्रिये, पिप्रियिव-पिप्रियिवहे. Aor. लुङ्—अप्रैषीत्-अप्रेष्ट. अप्रैषीः-अप्रेष्ठाः. अप्रैषम्-अप्रेषि. Fu. लृट्—प्रेष्यति-प्रेष्यते. Per Fu. लुट्—प्रेता. Con. लृङ्—अप्रेष्यत्-अप्रेष्यत. Ben. आशिषि लिङ्—प्रीयात्-प्रेषीष्ट. Pas. भावे—प्रीयते. Cau. णिजन्त—प्रीणयति, Aor. णिच्-लुङ्—अपिप्रीणत्. Des. सनन्त—पिप्रीषति-ते. Fre. यङन्त—पेप्रीयते. PP. निष्ठा—प्रीतः IP. क्त्वा—प्रीत्वा. Inf. तुमुन्—प्रेतुम्.

प्लु (प्लुङ्)—भ्वा A. अ. गतौ, to float, to fly, to jump. Pre. लट्—प्लवते. Pot. विधिलिङ्—प्लवेत. Imp. लोट्—प्लवताम्, Impf.—लङ्—अप्लवत. Perf. लिट्—पुप्लुवे. Aor. लुङ्—अप्लोष्ट. Fu. लृट्—प्लोष्यते. Per Fu. लुट्—प्लोता. Con. लृङ्—अप्लोष्यत. Ben. आशिषि लिङ्—प्लोषीष्ट. Pas. कर्मणि—प्लूयते. Aor. कर्म-लुङ्—अप्लावि. Cau. णिजन्त—प्लावयति, Aor. णिच्-लुङ्—अपुप्लवत्. Des. सनन्त—पुप्लूषते. Fre. यङन्त—पोप्लूयते. PP. निष्ठा—प्लुतः. IP. क्त्वा—प्लुत्वा. Inf. तुमुन्—प्लोतुम्.

फ

फल् (ञि फला)—भ्वा P. से. विसरणे, to burst open. Pre. लट्—फलति. Pot. विधिलिङ्—फलेत्. Imp. लोट्—फलतु. Impf. लङ्—अफलत्. Perf. लिट्—पफाल, फेलतुः. फेलिथ, फेलथुः. पफाल-पफल, फेलिव. Aor. लुङ्—अफालीत्. Fu. लृट्—फलिष्यति. Per Fu. लुट्—फलिता. Con. लृङ्—अफलिष्यत्. Ben. आशिषि लिङ्—फल्यात्. Pas. भावे—फल्यते, Aor भावे-लुङ्—अफालि. Cau. णिजन्त—फालयति, Aor. णिच्-लुङ्—अपीफलत्. Des. सनन्त—पिफलिषति. Fre. यङन्त—पंफुल्यते. PP. निष्ठा—फुल्लः, उत्+फल–उत्फुल्लः, सम्+फल=संफुल्लः, अन्योपसर्गपूर्वकान्न भवति—प्र+फल= प्रफुल्तः. IP. क्त्वा—फलित्वा. Inf. तुमुन्—फलितुम्.

शतधास्य फलेत् मूर्धा. हृदयं मे फलति सहस्रधा ॥

फल्—भ्वा P. से. निष्पत्तौ, to go, to result, to be successful. Pre. लट्—फलति. Like. फल् (ञिफला), but—PP. निष्ठा—फलितः.

फलन्ति न पथ्यानि विषद्रुमाः ॥ तस्य विद्या फलिष्यति॥ फलितम् अस्माकं कपटप्रबन्धेन ॥

फुल्ल—भ्वा P. अ. विकसने, to open, to blow. Pre. लट्—फुल्लति.

प्रफुल्लम्—फुल्लधातोः अच्प्रत्ययः.

लोध्रद्रुमं सानुमतः प्रफुल्लम्.

ब

बध्—भ्वा A. to loathe. से.(बन्धने). सनि परे नेट्. चित्तविकारार्थे नित्यसनन्तोऽयम्. Pre. लट्—बीभत्सते. Perf. लिट्—बीभत्सां चक्रे-बभूव-आस. Aor. लुङ्—अबीभत्सिष्ट. Fu. ऌट्—बीभत्सिष्यते. Per Fu. लुट्—बीभत्सिता. Con. ऌङ्—अबीभत्सिष्यत. Ben. आशिषि लिङ्—बीभत्सिषीष्ट. Pas. भावे—बीभत्स्यते. PP. निष्ठा—बीभत्सितः. Inf. तुमुन्—बीभत्सितुम्.

बन्ध्—क्र्या P. बन्धने, to bind. Pre. लट्—बध्नाति. बध्नासि. बध्नामि, बध्नीवः. Pot. विधिलिङ्—बध्नीयात्. बध्नीयाः. बध्नीयाम्. Imp. लोट्—बध्नातु, बध्नीताम्. बधान, बध्नीतम्. बध्नानि, बध्नाव. Impf. लङ्—अबध्नात्, अबध्नीताम्. अबध्नाः, अबध्नीतम्. अबध्नाम्, अबध्नीव. Perf. लिट्—बबन्ध, बबन्धतुः. बबन्धिथ-बबन्द्ध, बबन्धथुः. बबन्ध, बबन्धिव. Aor. अभान्त्सीत् अबान्द्धाम्, अभान्त्सुः. अभान्त्सीः, अबान्द्धम्, अबान्द्ध. अभान्त्सम्, अभान्त्स्व, अभान्त्स्म. Fu. ऌट्—भन्त्स्यति. Per Fu. लुट्—बन्धा. Con. ऌङ्—अभन्त्स्यत्. Ben. आशिषि लिङ्—बध्यात्. Pas. कर्मणि—बध्यते, Aor. कर्म-लुङ्—अबन्धि. Cau. णिजन्त—बन्धयति, Aor. णिच्-लुङ्—अबबन्धत्. Des. सनन्त—बिभन्त्सति. Fre. यङन्त—बाबध्यते. PP. निष्ठा—बद्धः. IP. क्त्वा—बद्ध्वा. Inf.—तुमुन्—बन्धुम्.

बाध्—भ्वा A. से लोड़ने, लोड़नं-प्रतिघातः, to oppress, to torment. Pre. लट्—बाधते. Pot. विधि-

लिङ्—बाधेत. Imp. लोट्—बाधताम्. Impf. लङ्—अबाधत. Perf. लिट्—बबाधे. Aor. लुङ्—अबाधिष्ट. अबाधिष्ठाः. अबाधिषि. Fu. लृट्—बाधिष्यते. Per Fu. लुट्—बाधिता. Con. लृङ्—अबाधिष्यत. Ben. आशिषि लिङ्—बाधिषीष्ट. Pas. कर्मणि—बाध्यते, Aor. कर्म-लुङ्-अबाधि. Cau. णिजन्त—बाधयति-ते, Aor. णिच्-लुङ्—अबबाधत्-त. Des. सनन्त—बिबाधिषते. Fre. यङन्त—बाबाध्यते. Kri. कृत्य—बाधितव्यः, बाधनीयः. PP. निष्ठा—बाधितः. IP. क्त्वा—बाधित्वा. Inf. तुमुन्—बाधितुम्.

बुध्—भ्वा P. से. अवगमने, to know, to perceive. Pre. लट्—बोधति. Pot. विधिलिङ्—बोधेत्. Imp. लोट्—बोधतु. Impf. लङ्—अबोधत्. Perf. लिट्—बुबोध. Aor. लुङ्—अबोधीत्. Fu लृट्—बोधिष्यति Per Fu. लुट्—बोधिता. Con. लृङ्—अबोधिष्यत्. Ben. आशिषि लिङ्—बुध्यात्. Pas. कर्मणि—बुध्यते. Aor. कर्म-लुङ्—अबोधि. Cau. णिजन्त—बोधयति, Aor. णिच्-लुङ्—अबूबुधत्. Des. सनन्त—बुबोधिषति-बुबुधिषति. Fre. यङन्त—बोबुध्यते. Kri. कृत्य—बोधितव्यः, बोधनीयः, बोध्यः. PP. निष्ठा—बोधितः-बुधितः. IP. क्त्वा—बोधित्वा बुधित्वा. Inf. तुमुन्—बोधितुम्.

बुध् (बुधिर्)—भ्वा U. से. बोधने, to know. Pre. लट्—बोधति-बोधते. Pot. विधिलिङ्—बोधेत्-बोधेत. Imp लोट्—बोधतु-बोधताम्. Impf. लङ्—अबोधत्-अबोधत. Perf. लिट्—बुबोध-बुबुधे. Aor. लुङ्—अबुधत्-

अबोधीत्-अबोधिष्ट. Fu. ऌट्—बोधिष्यति-ते. Per Fu. लुट्—बोधिता. Con. ऌङ्—अबोधिष्यत्-त. Ben. आशिषि लिङ्—बुध्यात्-बोधिषीष्ट. Pas. कर्मणि—बुध्यते, Aor. कर्मलुङ्—अबोधि. Cau. णिजन्त—बोधयति-ते. Aor. णिच्-लुङ्—अबूबुधत्-त. Des. सनन्त—बुबोधिषति-ते-बुबुधिषति-ते. Fre. यङन्त—बोबुध्यते. Kri. कृत्य—PP—IP and Inf—like बुध्.

बुध्—दिवा A. अ. अवगमने, to know, to perceive, to understand. Pre. लट्—बुध्यते. Pot. विधिलिङ्—बुध्येत. Imp. लोट्—बुध्यताम्. Impf. लङ्—अबुध्यत. Perf. लिट्—बुबुधे. Aor. लुङ्—अबोधि-अबुद्ध, अभुत्साताम्, अभुत्सत. अबुद्धाः, अभुत्साथाम्, अभुद्ध्वम्. अभुत्सि, अभुत्स्वहि, अभुत्स्महि. Fu. ऌट्—भोत्स्यते. Per Fu. लुट्—बोद्धा. Con. ऌङ्—अभोत्स्यत. Ben. आशिषि लिङ्—भुत्सीष्ट. Pas. कर्मणि—बुध्यते, Aor. कर्मलुङ्—अबोधि. Cau. णिजन्त—बोधयति (अस्य ण्यन्तात्परस्मैपदमेव), Aor. णिच्-लुङ्—अबूबुधत्. Des. सनन्त—बुभुत्सते. Fre. यङन्त—बोबुध्यते. Kri. कृत्य—बोद्धव्य. PP. निष्ठा—बुद्धः. IP. क्त्वा—बुद्ध्वा. Inf. तुमुन्—बोद्धुम्.

ब्रू (ब्रूञ्)—अदा U. से. व्यक्तायां वाचि, to speak.

Pre. लट्—

PARASMAIPADA.

ब्रवीति	ब्रूतः	ब्रुवन्ति
आह	आहतुः	आहुः

ब्रवीषि	ब्रूथः	ब्रूथ
आत्थ	आहथुः	
ब्रवीमि	ब्रूवः	ब्रूमः

ATMANEPADA.

ब्रूते	ब्रुवाते	ब्रुवते
ब्रूषे	ब्रुवाथे	ब्रूध्वे
ब्रुवे	ब्रूवहे	ब्रूमहे

Pot. विधिलिङ्—ब्रूयात्-ब्रुवीत, ब्रूयाताम्-ब्रुवीयाताम्. ब्रूयाः-ब्रुवीथाः, ब्रूयातम्-ब्रुवीयाथाम्. ब्रूयाम्-ब्रुवीय, ब्रूयाव-ब्रुवीवहि. Imp. लोट्—ब्रवीतु-ब्रूताम्, ब्रूताम्-ब्रुवाताम्, ब्रुवन्तु-ब्रुवताम्. ब्रूहि-ब्रूष्व, ब्रूतम्-ब्रुवाथाम्, ब्रूत-ब्रूध्वम्. ब्रवाणि-ब्रवै, ब्रवाव-ब्रवावहै, ब्रवाम-ब्रवामहै. Impf. लङ्—अब्रवीत्-अब्रूत. अब्रवीः-अब्रूथाः. अब्रवम्-अब्रुवि.

Perf. लिट्—

PARASMAIPADA.

उवाच	ऊचतुः	ऊचुः
उवचिथ-उवक्थ	ऊचथुः	ऊच
उवाच-उवच	ऊचिव	ऊचिम

ATMANEPADA.

ऊचे	ऊचाते	ऊचिरे
ऊचिषे	ऊचाथे	ऊचिध्वे
ऊचे	ऊचिवहे	ऊचिमहे

Aor. लुङ्—

PARASMAIPADA.

अवोचत्	अवोचताम्	अवोचन्
अवोचः	अवोचतम्	अवोचत
अवोचम्	अवोचाव	अवोचाम

ATMANEPADA.

अवोचत	अवोचेताम्	अवोचन्त
अवोचथाः	अवोचेथाम्	अवोचध्वम्
अवोचे	अवोचावहि	अवोचामहि

Fu. लृट्—वक्ष्यति-वक्ष्यते. Per Fu. लुट्—वक्ता; वक्तासि-वक्तासे; वक्तास्मि-वक्ताहे. Con. लृङ्—अवक्ष्यत्-अवक्ष्यत. Ben. आशिषि लिङ्—उच्यात्-वक्षीष्ट; उच्याः-वक्षीष्ठाः; उच्यासम्-वक्षीय. Pas. कर्मणि—उच्यते, Aor. कर्म-लुङ्—अवाचि. Cau. णिजन्त—वाचयति-ते, Aor. णिच्-लुङ्—अवीवचत्-त. Des. सनन्त—विवक्षति-विवक्षते. Fre. यङन्त—वावच्यते. Kri. कृत्य—वक्तव्यः, प्रवचनीयः. PP. निष्ठा—उक्तः. IP. क्त्वा—उक्त्वा. Inf. तुमुन्—वक्तुम्.

भ

भक्ष्—चुरा U. से. भक्षणे, to eat. Pre. लट्—भक्षयति-ते. Pot. विधिलिङ्—भक्षयेत्-त. Imp. लोट्—भक्षयतु-भक्षयताम्. Impf. लङ्—अभक्षयत्-त. Perf.

लिट्—भक्षयांचकार-चक्रे-आस-बभूव. Aor. लुङ्-ब्‌अ—भक्षत्-त. Fu. लृट्—भक्षयिष्यति-ते. Per Fu. लुट्—भक्षयिता. Con. लृङ्—अभक्षयिष्यत्-त. Ben. आशिषि-लिङ्—भक्ष्यात्-भक्षयिषीष्ट. Pas. कर्मणि—भक्ष्यते, Aor. कर्मलुङ्—अभक्षि. Cau. णिजन्त—भक्षयति (भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेन ॥). Des. सनन्त—बिभक्षयिषति-ते. Kri. कृत्य—भक्षयितव्यः, भक्षणीयः. PP. निष्ठा—भक्षितः. IP. क्त्वा—भक्षयित्वा. Inf. तुमुन्—भक्षयितुम्.

भक्षति-भक्षते इत्यपि ॥

भज—भ्वा U. अ. सेवायाम्, विभागे, to serve, to share. Pre. लट्—भजति-भजते. Pot. विधिलिङ्—भजेत्-भजेत. Imp. लोट्—भजतु-भजताम्. Impf. लङ्—अभजत्-त. Perf. लिट्—बभाज-भेजे, भेजतुः-भेजाते, भेजुः-भेजिरे. भेजिथ-बभक्थ-भेजिषे, भेजथुः-भेजाथे, भेज-भेजिध्वे. बभाज-भेजे, भेजिव-भेजिवहे, भेजिम-भेजिमहे. Fu. लृट्—भक्ष्यति-भक्ष्यते. Per Fu. लुट्—भक्ता. Con. लृङ्—अभक्ष्यत्-त. Ben. आशिषि लिङ्—भज्यात्-भक्षीष्ट. Pas. कर्मणि—भज्यते, Aor. कर्म-लुङ्—अभाजि. Cau. णिजन्त—भाजयति-ते, Aor. णिच्-लुङ्—अबीभजत्-त. Des. सनन्त—बिभक्षति-ते. Fre. यङन्त—बाभज्यते. Kri. कृत्य—वि+भक्तव्यः, वि+भज्यः. PP. निष्ठा—भक्तः, वि+भक्तः. IP. क्त्वा—भक्त्वा. Inf. तुमुन्—भक्तुम्.

भञ्ज् (भञ्जो)—रुधा P. अ. आमर्दने, to break, to disappoint. Pre. लट्—भनक्ति, भङ्क्तः, भञ्जन्ति.

भनच्मि, भङ्क्थः, भङ्क्थ. भनज्मि, भञ्ज्वः, भञ्ज्मः. Pot. विधिलिङ्—भञ्ज्यात्. Imp. लोट्—भनक्तु. भङ्ग्धि. भनजानि. Impf. लङ्—अभनक्, अभङ्क्ताम्, अभञ्जन्. अभनक्. अभनजम्. Perf. लिट्—बभञ्ज, बभञ्जतुः. बभञ्जिथ-बभङ्क्थ, बभञ्जथुः, बभञ्ज. बभञ्ज, बभञ्जिव. Aor. लुङ्—अभाङ्क्षीत्, अभाङ्क्ताम्. Fu. लृट्—भङ्क्ष्यति. Per Fu. लुट्—भङ्क्ता. Con. लृङ्—अभङ्क्ष्यत्. Ben. आशिषि लिङ्—भज्यात्. Pas. कर्मणि—भज्यते, Aor. कर्म-लुङ्—अभञ्जि-अभाजि. Cau. णिजन्त—भञ्जयति, Aor. णिच्-लुङ्—अबभञ्जत्. Des. सनन्त—बिभङ्क्षति. Fre. यङन्त—बम्भज्यते. PP. निष्ठा—भग्नः. IP. क्त्वा—भङ्क्त्वा-भक्त्वा. Inf. तुमुन्—भङ्क्तुम्.

भण्—भ्वा P. से. शब्दे, to sound, to speak. Pre. लट्—भणति. Perf. लिट्—बभाण. Aor. लुङ्—अभानीत्-अभणीत्. Fu. लृट्—भणिष्यति. Per Fu. लुट्—भणिता. Pas. कर्मणि—भण्यते, Aor. कर्म-लुङ्—अभाणि. Cau. णिजन्त—भाणयति, Aor. णिच्-लुङ्—अबीभणत्. Des. सनन्त—बिभणिषति. Fre. यङन्त—बम्भण्यते. PP. निष्ठा—भणितः. IP. क्त्वा—भणित्वा. Inf. तुमुन्—भणितुम्.

भर्त्स्—चुरा A. से. भर्त्सने, to abuse, to deride, to threaten. Pre. लट्—भर्त्सयते. Perf. लिट्—भर्त्सयांचक्रे-आस-बभूव. Aor. लुङ्—अबभर्त्सत. Fu. लृट्—भर्त्सयिष्यते. Ben. आशिषि लिङ्—भर्त्सयिषीष्ट. Pas. कर्मणि—भर्त्स्यते, Aor. कर्म-लुङ्—अभर्त्सि. Des. सनन्त—बिभर्त्सिषते. PP. निष्ठा—भर्त्सितः. IP. क्त्वा—भर्त्सित्वा. Inf. तुमुन्—भर्त्सितुम्.

भा—अदा P. अ. दीप्तौ, to shine, to appear. Pre. लट्—भाति. Pot. विधिलिङ्—भायात्. Imp. लोट्—भातु. Impf. लङ्—अभात्, अभाताम्, अभुः-अभान्. Perf. लिट्—बभौ, बभतुः, बभुः. बभिथ-बभाथ, बभथुः, बभ. बभौ, बभिव, बभिम. Aor लुङ्—अभासीत्. अभासीः. अभासिषम्. Fu. ऌट्—भास्यति. Per Fu. लुट्—भाता. Con. ऌङ्—अभास्यत्. Ben. आशिषि लिङ्—भायात्' Pas. भावे—भायते, Aor. भावे-लुङ्—अभायि. Cau. णिजन्त—भापयति, Aor. णिच्-लुङ्—अबीभपत्. Des. सनन्त—बिभासति. Fre. यङन्त—बाभायते. PP. निष्ठा—भातः. Inf. तुमुन्—भातुम्.

वि + अति + भा = व्यतिभाते.

भाष—भ्वा A. से. व्यक्तायां वाचि, to speak, to say, to call. Pre. लट्—भाषते. Perf. लिट्—बभाषे. Aor. लुङ्—अभाषिष्ट. Fu. ऌट्—भाषिष्यते. Per Fu. लुट्—भाषिता. Con. ऌङ्—अभाषिष्यत. Ben. आशिषि लिङ्—भाषिषीष्ट. Pas. कर्मणि—भाष्यते, Aor. कर्म-लुङ्—अभाषि. Cau. णिजन्त—भाषयति, Aor. णिच्-लुङ्—अबभाषत्-त-अबीभषत्-त. Des. सनन्त—बिभाषिषते. Fre. यङन्त—बाभाष्यते. Kri. कृत्य—भाषितव्यः. PP. निष्ठा—भाषितः. IP. क्त्वा—भाषित्वा. Inf. तुमुन्—भाषितुम्.

भास्—भ्वा A. से. दीप्तौ, o shine. Pre. लट्—भासते. Cau. णिजन्त—भासयति, Aor. णिच्-लुङ्—अबीभसत्-अबभासत्.

भिच्—भ्वा A. से. भिक्षायाम्, to beg, to obtain. Pre. लट्—भिक्षते. Pot. विधिलिङ्—भिक्षेत. Imp. लोट्—भिक्षताम्. Impf. लङ्—अभिक्षत. Perf. लिट्—बिभिक्षे. Aor. लुङ्—अभिक्षिष्ट. Fu. लृट्—भिक्षिष्यते. Per Fu. लुट्—भिक्षिता. Con. लृङ्—अभिक्षिष्यत. Ben. आशिषि-लिङ्—भिक्षिषीष्ट. Pas. कर्मणि—भिक्ष्यते, Aor. कर्म-लुङ्—अभिक्षि. Cau. णिजन्त—भिक्षयति, Aor. णिच्-लुङ्—अबिभिक्षत्. Des. सनन्त—बिभिक्षिषते. Fre. यङन्त—बेभिक्ष्यते. Kri. कृत्य—भिक्षितव्यः. PP. निष्ठा—भिक्षितः. IP. क्त्वा—भिक्षित्वा. Inf. तुमुन्—भिक्षितुम्.

भिद्—(भिदिर्) रुधा U. अ. भेदने, to separate, to break down.

Pre. लट्—

PARASMAIPADA.

भिनत्ति	भिन्तः	भिन्दन्ति
भिनत्सि	भिन्थः	भिन्थ
भिनद्मि	भिन्द्वः	भिन्द्मः

ATMANEPADA.

भिन्ते	भिन्दाते	भिन्दते
भिन्त्से	भिन्दाथे	भिन्द्ध्वे
भिन्दे	भिन्द्वहे	भिन्द्महे

Pot. विधिलिङ्—भिन्द्यात्-भिन्दीत. भिन्द्याः-भिन्दीथाः. भिन्द्याम्-भिन्दीय. Imp. लोट्—भिनत्तु-भिन्ताम्. भिन्धि-

